Title व्रतार्कशास्त्रम्

Author +

Extent २६८ Age +

Subject धर्मशास्त्रम् · संपूर्णम्

नं० ५४२६-घ
व्रतार्कशास्त्रम् (धर्मशास्त्रम्)
पत्राणि २६८ (सम्पूर्णम्)



व्र॰
ता॰
१

ॐ श्रीगणेशाय नमः ॐ श्रीकृष्णाय नमः ॐ ज्ञानेनं यस्त्रिपुरं हरेण हरिणा ब्रह्मा हलेनं न्यने स्वष्टं वारिभवोद्भवेन विधिना शे
षेणाथ सैंधराम् पार्वत्या महिषासुरप्रमथने सिद्धाधिपैर्मन्मथेध्यातः पंचशरेण विश्व[illegible]जये पाणात्मना गात्रतः सदेवाकर
पदद्वंद्वं फलद्वंद्वप्रदायकं त्रैलोक्यातमसोनाशाकर्त्तेतं त्वणमाम्यहं २ योत्साग्रग्निरु[illegible]मन्दराद्रिमथैर्निर्मथ्यप्रथिततरां
धकारसिंधुं लोकेभ्यो वितरति तत्प्रकाशरत्नं वंदे तं वनत्वनीविनोदं वंधुं ३ नामेन प्रणामो दुरभत्तव तहोवनालिंग
नेन धाम्यहं गाङ्गभूरिभ्रमज्जलनपरोज्ञानकीनहल भांश्रीतातश्रीनीलकंठाद भ्रुनपदकृपयालब्धशास्त्रार्थतत्त्वः केशवश्रीधरा
करोहं सहृदयहृदयंप्रीतये सद्व्रतार्कं ४ अत्र च व्रतकर्त्तव्यविषया नियतः संकल्पो व्रतमिति श्रीदत्तः तत्र अग्निहोत्रं तथा
वंधनादि विषयो संकल्पेतिप्रसक्तेः किं तन्निपुणकव्रतप्रसिद्धविषयः संकल्पविशेष वप्रतं न च व्रतं संकल्पे पदियनवपश्नि
वाक्यं पाकं पवति दानं दद्यादिति च प्रत्ययानुग्रहार्थं प्रयोगोपपत्तिरिति निव्याः तत्र व्रतकालमाह हेमाद्रौ गार्ग्यः अस्तगे च
गुरौ शुक्रे वाले वृद्धे मलिम्लुचे उद्यापनमुपारंभं व्रतानां नैव कारयेत् तत्रैव वृहस्पतिः अग्न्याधानं प्रतिष्ठां च यज्ञदा
नव्रतानि च मांगल्यमभिषेकं च मलमासे विवर्जयेत् वालेवा यदि वा वृद्धे शुक्रे चास्तंगते गुरौ मलमासइवैतानि वर्जयेत्
देवदर्शनं लल्लः नीचस्थे वक्रसंस्थेप्यतिचरणगते वालवृद्धास्तगे वा संन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधस्तु दी
क्षा मौंजीवंधोथ चूडापरिणयनविधिर्वास्तु देवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते चेति नी १

वस्थो मकरस्थः कन्यतौ देवीपुराणे सिंहस्थस्य गुरुस्थांके सर्वारंभं च वर्जयेत् प्रारब्धं न च सिध्येत महाभयकरं भवेत् पुत्रमि
त्रकलत्राणि हन्यान्नशीघ्रं न संशयः देवारागतडागेषु व्रतोद्यानगृहेषु च सिंहस्थं वै गुरुं यत्नेन वर्जयेत् वसिष्ठः सिंह
स्थे तु महायानं स्थे गुरुं यत्नेन वर्जयेत् अन्यत्र सिंहभागेषु सिंहस्थोपि न दुष्यतीति सिंहस्थगुरोर्वर्ज्जनीयत्वं नर्मदोत्तरभा
ग एव अन्यत्र सिंहांशकमेव वर्ज्यः तथा च मदनरत्नादिस्मृत्युक्तकालविधाने सिंहस्थितः सुरगुरुर्यदि नर्मदायाल्लां वर्ज्जे
येत्सकलकर्मसु सौम्यभागे विंध्यस्य दक्षिणदिशि प्रवदंति तज्ज्ञाः सिंहांशके मृगपतावपि वर्ज्जनीयमिति सिंहस्थालु
पूर्वकाल्गुण्णयत्रमपरः मृगपतौ मकरस्थे गुरौ मकरस्थगुरौ विशेषमाह लल्लः नर्मदापूर्वभागे तु शोणस्यो
त्तरदक्षिणे गंडकाः पश्चिमे भागे मकरस्थो न दोषभागिति केषांचित्स्त्रीकर्तृकाणामपि च व्रतानां गुरुगस्त्योदयेप्यारं
भं निषेधति हेमाद्रौ लौगाक्षिः उद्यानिकाशिवपवित्रकमेघपूजा दूर्वाष्टमी फलविरूढकजागराणि स्त्रीणां व्रता
नि निखिलान्यपि वार्षिकाणि कुर्यान्नगस्त्यउदिते न शुभानि लिप्सुरिति उद्यानिकाव्रतविशेषः शिवपवित्रकं श्रावा
ण्यामथवा भाद्रयां विहितं शिवस्य पवित्रारोपणं मेघपूजा व्रतविशेषः दूर्वाष्टमी भाद्रशु[illegible]ष्टमी फलविरूढकं भाद्रशु
क्लचतुर्दश्यां पालीव्रतकदलीव्रतापरनामकं जागरं आश्विनपौर्णमास्यां कोजागरव्रतं कार्त्तिकचतुर्दश्यां विहितं जा
गरव्रतं वा अत्रोभयत्रागस्त्योदयस्यावश्यंभावित्वेन विधेरनवकाशापत्तेर्विकल्पो ज्ञेयः वार्षिकाणीत्यत्र वर्षास्तु भ

व्र॰ वानि वार्षिकाणीत्येवमुक्तत्रिर्नत्तुवर्षे भवानीति तथा न सिंहार्कादि दिग्गीष्मपर्यंतमगस्त्योदयात्सुमुहूर्ते तन्मध्ये विहितानां
ता॰ तीर्थव्रतानां सर्वथानारंभः एवमापद्येतऽनिष्णगस्त्योदयकालश्च दिवोदासीये उदेतिदृत्याम्यांइंहस्तिंकन्याद्वये काधिके विंश
२ तिमेऽगस्त्यः स्वमपे संबुधा संज्ञमाद्यप्रयाति गर्गादिरि भ्यभाषि व्रतारंभसमाप्तोऽक्तिप्य विशिनष्टि हेमाद्रौ सत्यव्र
तः उदयस्था तिथिर्याहि न भवेद्दिनमध्यभाक् सा खंडा न व्रतानां स्यादारंभश्च समापनं एतच्च तिथिक्रियायामखंडायां
प्रारंभमाह तथैव वृद्धवसिष्ठः स्वाखंडव्यापिमार्तंडायवखंडा भवेत्तिथिः व्रतप्रारंभणं तस्या मनस्तगुरुशुक्रयोरिति
अनस्तमितगुरुशुक्रायां तिथौ व्रतप्रारंभणीयमित्यर्थः रत्नमालायां सौम्यसौम्यगुरुशुक्रवासराः सर्वकर्मसु भवंति
सिद्धिदाः भानुभौमशनिवासरेषु च प्रोक्तमेव खलु कर्म सिध्यति विरुद्धसंज्ञा इह ये च योगास्तेषामनिष्टः खलु पादस्त्याज्यः
सर्वे धृतिस्त्व व्यतीपातनामा सर्वोप्यनिष्टः परिघस्य चार्धं तिस्रस्तु योगे प्रथमेस वज्रे व्याघातसंज्ञे नवपंचशूले गंडे तिस्रःषड्
षट्केवलाश्चः शुभेषु कार्येषु विवर्जनीयाः ब्रह्मयामले दिनभद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा न तत्र ज्ञाः शुभकार्येषु शाहुरे
वमुशनना त्विति अथ देशाः व्यासः सर्वे शिलोच्चया पुण्याः सागराः सरितस्तथा अरण्यानि च पुण्यानि विशेषात्तेषु नैमि
षं तथा देवीपुराणे दशाश्वमेधे गयाशैलं गंगानर्मदपुष्करं वाराणसी कुरुक्षेत्रं प्रयागं त्र्यंबकेश्वरं केदारं वामणाद्य
ऊटं च पुष्करारण्यं सोमेश्वरं महापुण्यं तथा चामरकंटकं कालंजरं तथा विंध्यं यत्र वामो गुरुहस्य च गुहः स्वामिकार्ति

केयः मनुः सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् तं ब्रह्मनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते यस्मिन्देशे य आचारः पारंपर्यक्रमागतः
वर्णानां सांतरालानां स सदाचार उच्यते कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनिकाः एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनंतरः
मत्स्या विराटाः पंचालाः कान्यकुब्जाः शूरसेनिका मथुरादेशाः अनंतरः समः हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि प्र
त्यगेव प्रयागाच्च मध्यदेशः उदाहृतः विनशनं कुरुक्षेत्रं आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् तयोरेवांतरं गिर्योरार्या
वर्तं विदुर्बुधाः सिंधुनदीपश्चिमतीरव्याप्तत्वं पूर्वमाह कृष्णसारस्तु चरति मृगो यत्र स्वभावतः स ज्ञेयो यज्ञियो देशो म्लेच्छदे
शस्ततः परः एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः याज्ञवल्क्योपि यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोध
तेति अथ व्रताधिकारिणः स्कांदे निजवर्णाश्रमाचारनिरतः शुद्धमानसः अलुब्धः सत्यवादी च सर्वभूतहिते रतः
व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः श्रद्धावान्पापभीरुश्च मददंभविवर्जितः पूर्वं निश्चयमाश्रित्य यथावत्कर्म
कारकः अवेदनिंदको धीमानधिकारी व्रतादिषु निजवर्णाश्रमाचार इत्यनेन वर्णानामधिकारो गम्यते अत एव कौ
र्मे ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तम अर्चयंति महादेवं यज्ञदानसमाधिभिः व्रतोपवासनियमैः होमस्वा
ध्यायतर्पणैः तेषां वै रुद्रसायुज्यं सामीप्यं नातिदुर्लभं सलोकता च सारूप्यं जायते तत्प्रसादतः देवलोपि व्रतोपवा
सनियमैः शरीरतापनैस्तथा वर्णाः सर्वेपि मुच्यंते पातकेभ्यो न संशयः अथाधिकारविशेषः मात्स्ये पुंस्त्वसाविवत्ति

व्र· ता· र

3

तत्रादौ स्त्रीणामप्यधिकारः भारते मानुष्याश्रित्य कौन्तेय ये विष्णुशरणं गताः स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां ग
तिमिति क्वचित् म्लेच्छानामप्यधिकारो हेमाद्रौ देवीपुराणे स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैः वैश्यैः शूद्रैर्भक्तियु
तैः म्लेच्छैरन्यैश्च मानवैः स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु वैश्यशूद्रयोस्तु द्विरात्राधिकोपवासो न भवति ॥
वैश्याः शूद्राश्च ये मोहादुपवासं प्रकुर्वते त्रिरात्रं पंचरात्रं वा तयोर्व्युष्टिर्न विद्यते इति शंखलिखितनिषेधात् व्युष्टिः फलं
सभर्तृकाणां भर्त्राद्यनुज्ञां विना नाधिकारः ॥ तथा च मदनरत्ने मार्कंडेयपुराणे नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन
वा ॥ निःफलं तद्भवेत्तस्याः यत्करोति व्रतादिकं भर्त्राज्ञया सर्वव्रतेष्वधिकारः भार्या भर्तुर्मतेनैव व्रतादीनाचरेदिति
कात्यायनोक्तेः तथा च पत्यौ जीवति या नारी उपवासं व्रतं चरेत् आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेदिति विष्णुवचनं
तद्भर्त्रननुज्ञापरं यत्तु क्वचित् नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं भर्तृशुश्रूषयैवैताः लोकानिष्टान्व्रजंति
ताः यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्याद्भार्याभ्यर्चनं सत्क्रियां च तस्यार्द्धं सा फलं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैवेति
स्कांदात् सभर्तृकाणामेकादश्याद्युपवासादावनधिकार इति न तत्तस्यापि शुश्रूषाकृत्वानंतरेण भर्त्रननुज्ञापरत्वात् अतएव
व्यासः कामं भर्त्रनुज्ञाता व्रतादिष्वधिकारिणीति शंखोपि कामं भर्त्रानुज्ञया व्रतोपवासनियमाः स्त्रीधर्मा इति न वा
नुज्ञया व्रतेष्विव यज्ञेपि पृथगधिकारापत्तिरिति वाच्यं तस्याः श्रवणाध्ययनजन्यज्ञानाभावेनापत्त्यभावात् यदा स्कांदादस्य

भर्तृशुश्रूषया लोकान्कर्तनाप्नुयात्स्त्रियादिति न च भर्त्रनुज्ञयैवाधिकारोस्त्विह विधवाया व्रतानधिकारापत्तेरिति वाच्यं नारी ख
ल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकमिति मार्कण्डेयोक्तेः पित्राद्याज्ञायास्तस्याधिकार
इति हेमाद्रिः स्त्रीणां व्रतग्रहणे विशेषो हेमाद्रौ वह्निपुराणे स्नानं कार्यं च शिरसस्ततः फलमवाप्नुयात् स्नात्वा स्त्रीयात
रुत्याय यतिं विज्ञापयेत्सती अथ व्रतधर्माः व्रतसंकल्पविधिः भारते गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः उपवासं तु
गृहीयाद्यद्वा संकल्पयेद्बुधः औदुंबरं ताम्रमयं उदुंबरं स्मृतं ताम्रे इति विश्वोक्तेः यद्वा पूर्वोक्तादिकं संकल्पयेदिति कल्प
तरुः श्रीदत्तस्तु कल्पतरुमनेवाकारस्यार्थेनायमर्थः यस्तु नक्तादिकं नैमित्तिकं तदपि उक्तविधिनैव गृह्णीयादि
ति तन्मतं परिष्कृत्य वाकारणस्योपवासपदस्यैव वैयर्थ्यापत्तेः यत्संकल्पयेन्न गृह्णीयादित्यनेनैवोपपत्तेरिति हृषयत्
नाम्न पात्राद्यभावे हस्तेनापि जलं गृहीत्वा संकल्पयेदित्युक्तं अतएवानंतभट्टीये हस्तेन वार्येव धारयेदिति पाठः ॥
मदनरत्ने देवलवाक्ये यथा संकल्पयेदिति पाठः यत्कामं फलमुद्दिश्येदिति पाठः अतएव मार्कण्डेयः संकल्प्य च
यथा कुर्यात्स्नानदानव्रतादिकं अनंतरं कृत्यमाह मदनरत्ने देवलः अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः सूर्या
य देवताभ्यश्च निवेद्य व्रतमाचरेत् अत्र प्रातर्व्रतमाचरेदित्येवान्वयः प्रधानक्रियान्वयस्याभ्यर्हितत्वात् अभुक्त्वेति तु
अशक्तस्याभ्यनुज्ञातेत्वादिभक्षणापवादः केचित्तु व्रतदिने प्रातराहारमभुक्त्वा व्रतमाचरेदित्याहुः तन्न उपवास

व्र· ता· ४ वताकार्यमित्यनेनैवाभक्तवतोधिकारस्यप्राप्तत्वादेतस्यैवैयर्थ्यापत्तेः अन्येतुपूर्वदिनेप्रातराहारमभुक्त्वाग्रर्धादिकम
कृत्वोत्तरदिनेस्नात्वाचम्यव्रतादिकंकुर्यादित्याहुः परेतु सर्वत्रपूर्वेद्युरेवसायंसंध्यांतरंव्रतंग्राह्यंवारव्रतादौबहुश
स्त्रपाठदृष्टत्वात् प्रातःस्नातेतिवाक्यद्वयमित्याहुः सामान्यधर्माहेमाद्रौभविष्ये क्षमासत्यंदयादानंशौचमिंद्रियनिग्रहः
देवपूजाग्निहवनंसंतोषस्तेयवर्जनं सर्वव्रतेष्वयंधर्मः सामान्योदशधास्थितः देवपूजायद्दैवत्यंव्रतंतस्यपूजाग्नि
हवनेतुतद्दैवत्योद्देशेनहोमःकुर्यात् एतच्चसप्तमीव्रतेसूर्यपूजाग्निहवनंनवमीव्रतेदुर्गापूजाप्यनुक्तदेवताव्रतेतु
देवतापूजाहवनंव्याहृतिहोममितिकेचित् अत्रक्षमादीनांव्रतेव्रतयावत्तद्वर्गसाधनत्वेनविहितानांव्रतानंगतयावि
धानंत्वादित्यवीर्यकामस्यपूर्वंकुर्यादितिवत्संयोगपृथक्त्वादुपपन्नमिति हेमाद्रिः सर्वव्रतेष्वित्यत्रसर्वव्रतपदंभविष्यत्पु
राणीयसप्तसर्वव्रतपरमतोव्रतांतरेविध्यंतरसत्त्वएवहोमादीनामंगत्वंनान्यथा अतएवैकादशीव्रतादौशिष्टानांहोमा
धनाचरणमितिकेचित् वस्तुतस्तुयेषुव्रतेषुप्रमाणांतरात्व्रतेषुहोमादिविधिरस्तितद्विषयकमेवसर्वपदमन्यथातदितर
परत्वेनसंकोचापत्तेरितिदिक् स्त्रीवृद्धार्दस्येक्षिप्राणे स्नात्वाव्रतवतासर्वव्रतेषु व्रतमूर्तयः पूज्याःस्ववर्णमयायाशक्त्यावे
भूमिशायिनाजपोहोमस्तुसामान्यंव्रतांतेदानमेवच चतुर्विंशद्द्वादशवापंचवात्रयएववा विप्राःपूज्यायथाशक्तिते
भ्योदद्याच्चदक्षिणांव्रतमूर्तयःस्वदेवताप्रतिमाः देवलः ब्रह्मचर्यमहिंसाचसत्यमामिषवर्जनं व्रतेष्वेतानिचत्वारिचीर ४

तथा नित्यशः स्त्रीणां तु प्रेक्षणात्स्पर्शाज्ञाभिः संकथनादपि विपद्यते ब्रह्मचर्यं न दारेष्वृतुसंगमादिति स्वदारेष्वृतुसं
गमादिति क्वचित्पाठः आमिषं मांसं आमिषं रतियानीयं गोवर्ज्यं क्षीरमामिषं मसूरमामिषं सस्यफलेजं वीरमामिषं ।
आमिषं शुक्तिकाचूर्णं नारनालं तथामिषमिति स्मृत्यन्तरोक्तं व्रताद्यारंभे हि श्राद्धकार्यं तदाह शातातपः तानि ह्यात
पितॄन् श्राद्धे कर्म किंचित्समारभेत् गृहीतव्रतानां नाचरणे मदनरत्नेच्छागालेयः पूर्वं व्रतं गृहीत्वा यो नाचरेत्काममोहि
तः जीवन्भवति चाण्डालो मृतः श्वा चाभिजायते काममोहित इति विशेषणाद्व्याध्यादिना नाचरणे न दोषः तथावह्नि
माहेस्कांदे सर्वभूतभयं व्याधिः प्रमादो गुरुशासनं अव्रतघ्ना विपद्यंते सकृदेतानि शास्त्रतः सर्वेभ्यो भूतेभ्यो भ
काशाद्भूतकर्तृभयं गुरुशासनं गुरोराज्ञा सकृदिति सकृत्त्यागेन प्रायश्चित्तं तदुक्तं स्कांदे गारुडयोः क्रोधात्प्रमा
दाल्लोभाद्वा व्रतभंगो भवेद्यदि दिनत्रयं भुंजीत मुंडनं शिरसोऽथवा न वात्र प्रायश्चित्तात्तेरतिक्रांतव्रतानाचरणामि
तिवाच्यं प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेदिति स्कंदात् अथोपवासधर्मा तत्रोपवासस्वरूपं कात्यायनवृद्धवसि
ष्ठाभ्यां दर्शितं उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह उपवासः स विज्ञेयः सर्वभोगविवर्जितः गुणाः तज्जपनध्यानत
कथाश्रवणादयः उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः त्याज्याः सर्वे प्रभृतयस्तु तानि रतन त्यापाशो वमनायासो मैग
त्यतकार्पण्यमरहितोद्यादि विष्णुधर्मोत्तरमोक्षमाश्रितानियादिनैः तत्कृत्यं नो पास्या देवता व्रतदेवता पर्वं वपायनि

व्रं॰
ता॰
५

5

वृत्याद्गुणाद्वृत्तेनेनवसहितो निराहारस्य वासो वस्थानमुपवासः उक्तं भवति इदं च फलसाधनं सोपवासस्य स्वरूपमुक्तं
उपवासपदार्थस्त्वस्मृतिपुराणव्यवहारे तु प्रत्यन्निराहारावस्थानमात्रं रूढवृत्तिः उपवासे तथा श्राद्धे न कुर्याद्दन्तधा
वनं काष्ठेनेति शेषः अत एव नन्दिदिने दन्तानां काष्ठसंयोगो हन्ति सप्तकुलानि चेति वाक्यशेषाद्विशेषनिषेधसा
पि विशेषपरता श्रौतेवतेन अलाभे वा निषेधे वा काष्ठानां दन्तधावने पर्णादिना विशुद्धेत जिह्वोल्लेखः सदैव हीति पै
ठीनसि वचसा अलाभेन काष्ठानां निषिद्धानां तथा तिथौ अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनमिति व्यासवचसा
पर्णादिना द्वादशगण्डूषैर्वा दन्तधावनं कार्यमेव देवलः असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् उपवासः प्रणश्ये
त दिवास्वापाच्च मैथुनात् अशक्तौ वतेनैव तज्जलपानमभ्यनुज्ञातं अत्यये चाम्बुपानेन नोपवासः प्रणश्यति अत्यये ज
लपानं विना प्राणात्यये विष्णुधर्मे असकृज्जलपानं च दिवास्वापं च मैथुनं ताम्बूलं चरणं मांसं वर्जयेद्व्रतवासरे अस
कृद्ग्रहणात्सकृज्जलपानेन न दोषः अत्र पारणं तत्र नैवेद्यं व्रतान्ते विप्रभोजनं अन्नमांसे व्रते ऽप्येवं कुर्यान्नैव व्रतान्तरमिति न
स्नापि व्रतवासरत्वान्मांसनिषेधः पारणादिने एव च न तत्रोपवासदिने प्रसक्त्याभावात् अत एव निर्णयामृते व्यासः व
र्जयेत्पारणे मांसं व्रताहे प्यौषधं सदेति अष्टौ तान्यव्रतघ्नानि आपो मूलं पयः हविः ब्राह्मणकाम्या गुरोर्वचनमौषध
मिति स्कन्दवचसा पलरूपमपि मांसं व्रताहे वर्जयेदित्यर्थः विष्णुरहस्ये स्पर्शनालोकनगन्धादिस्वादनं परिकीर्तनं

अव्रतस्य वर्जयेत्सर्वं ग्रासानां च भिक्षां त्यजेत् गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्रागकृदिति॥
हारीतः पतितपाषंडादिनास्तिकादिसंभाषणानृताश्लीलादिकमुपवासादिषु वर्जयेदिति तथादिपदेन यत्क्रूरकार्यं तथा
सर्वदा निषिद्धं तद्विशेषतो वर्ज्यं तथा संसृज्यते अतएव व्रताधिकारे मंत्रः विहितस्नानध्यानमिंद्रियाणामनिग्रहः निषिद्धसेवनं
नित्यं वर्जनीयं प्रयत्नतः पतितादेर्दर्शने तु विष्णुपुराणे तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः स्पर्शे दोषविशुद्धये संस्पर्शे च न
रः स्नात्वा ताम्रविरादित्यदर्शनात् संभाषित्वा तथा विप्रं विचिंतयेदच्युतं बुधः योगयाज्ञवल्क्यः यदि वागपमलेभ्यः स्याद्व्रतदान
क्रियादिषु व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं यमः मानसे नियमे लुप्ते स्मरेद्विष्णुमनामयमिति बृहन्नारदीये रज
स्वलां च चांडालं महापातकिनं तथा सूतिकां पतितं चैव उच्छिष्टरजकादिकं वनादिमध्ये श्रवणाय यो ... निवृत्तमः अष्टोत्त
रसहस्रं तु जपेद्वै वेदमातरं वेदमाता गायत्री नित्ता सारायांदक्षः संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु यदन्यत्कुरुते किं
चिन्न तस्य फलमश्नुते अत्र प्रातःसंध्यैवांगमिति केचित् तातचरणास्तु विशेषाभावात्संध्योत्तरभाविनि कर्मादौ सांगमिति पु
नमाहुः प्रातःकालीनव्रतादिसंकल्पस्तु प्रातःसंध्यांतमेव कार्यः प्रातःसंध्यां बुधः कृत्वा संकल्प्य व्रतमाचरेदिति गौडनिबंध
धृतस्मृतेः मार्कंडेयपुराणे सूर्योदयं विना नैव स्नानदानादिकं क्रमः इति क्रमः उपक्रमः कृष्णांगपरिशिष्टे सदोपवीतिना भा
व्यं सदा बद्धशिखेन च विशिखो व्युपवीतश्च यत्करोति न तत्कृतं पितृमंत्रानुद्रवणे आत्मालंभेऽधवेक्षणे अधोवायुसमुत्सर्गे

व्र॰
ता॰
६

प्रस्रवेत्तत्रभाषणे मार्ज्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत् मार्कण्डेयपुराणे शिर
स्नातस्तु कुर्वीत दैवं पित्र्यमथापि वा वाराहपुराणे स्नानं संध्यादि तर्पणादि जपहोमामरार्चनं उपवासवता कार्यं सायंसं
ध्याहुतीर्विना भगवद्गीतायां तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां आपस्तं
बः त्रिमात्रस्तु प्रयोक्तव्यः कर्मारंभेषु सर्वशः इति विस्तरतस्त्वेषं सामान्यपरिभाषा तानि व्रतोक्तत्र आचारमयूखे द्रष्टव्या प्रसूती
णां विशेषो हेमाद्रौ पाद्मे गर्भिणी सूतिका दिर्नक्तं कुमारी वाथ रोगिणी यदाशुद्धा तदान्येन कारयेत्प्रयता स्वयं प्रयताशुद्धा स्व
यं कुर्यादित्यर्थः पुंस्त्वाख्येयलिंगस्याविवक्षितत्वादिति हेमाद्रिः एवं स्त्रीरजोदर्शनेपि कार्यं तथा च सत्यव्रतः प्रारब्धदीर्घत
पसां नारीणां यद्रजो भवेत् न च तत्र व्रतस्य स्यादुपरोधः कथंचन व्रतस्य उपवासस्सेनार्थः पूजादिकं त्वन्येन कारयेत् तथा च
मदनरत्ने मात्स्ये अन्तरा तु रजोयोगे पूजामन्येन कारयेत् एतत्केणापरार्थं भवत्येव तथा च तत्रैव पूर्वं संकल्पितं यच्च व्रतं सु
नियतव्रतैः तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितमिति केनकारयेदित्यपेक्षायां तत्रैव पैठीनसिः भार्या पत्युर्व्रते कुर्याद्भा
र्यायाश्च पतिर्व्रतं असामर्थ्ये पतिस्ताभ्यां व्रतभंगो न जायते तत्रैव वायुपुराणे उपवासेत्वशक्तश्चेदाहिताग्निरथापि वा पुत्रा
न्वा कारयेदन्यान्ब्राह्मणान्वापि कारयेत् उपवासं प्रकुर्वाणाः पुण्यं शतगुणं लभेत् नारी च पतिमुद्दिश्य एकादश्यामुपोषिता
पुण्यं शतगुणं प्राप्नोतीत्याह गालवो मुनिः मातामहादीनुद्दिश्य एकादश्यामुपोषणे कृते च नूनं फलं विप्राः समग्रं फलमा ६

मुमुः पत्नेवप्रतिनिधयोनकाम्ये तथाच स्मृत्नेकाम्येप्रतिनोस्तिनित्ये नैमित्तिकेऽपिच काम्येषूपक्रमादूर्ध्वं केचित्प्रतिनिधिं
विदुः नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु सदेशकालयोर्नोपिनारणीरग्निरेवच नापिप्रतिनिधानस्यनिषि
द्धवस्तुअंचचित् अथव्रतहविष्याणि हेमाद्रौ कौर्मे शिष्टिकात्यायनहविष्येषु यवामुख्यास्तदनुव्रीहयः स्मृताः
माषकोद्रवगौरादीन्सर्वालाभेविवर्जयेत् तत्रैव अग्निपुराणे व्रीहिषष्टिकमुद्गास्तु कलायाः सतिलायवाः श्यामा
काश्चैवनीवारागोधूमाद्याव्रतेहिताः कूष्माण्डालाबुवार्ताकपालक्यज्योत्स्निकास्त्यजेत् चरुभैक्ष्यंसक्तुकणाः शा
कंदधिघृतंमधु श्यामाकशालिनीवाराः यावकंमूलतंडुलं हविष्यंव्रतनक्तादावग्निकार्यादिकेहितं मधुमांसं
विहायान्यद्व्रतेचहितमीरितं पालक्येति पलाक्यंतिशाकविशेषः ज्योत्स्निकाकोशातकी तत्रैवभविष्ये हैम
न्तिकासितास्विन्नंधान्यंमुद्गायवास्तिलाः कलायकंगुनीवारावास्तूकंहिलमोचिका षष्टिकाकालशाकंचमूलकं
केमुकीनरत् कंदःसैंधवसामुद्रेगव्येचदधिसर्पिषी पयोऽनुद्धृतसारंचपनसाम्रहरीतकी पिप्पलीजीरकंचैव
नागरंगकतिंतिडी कदलीलवलीधात्रीफलान्यगुडमैक्षवं अतैलपक्वंमुनयोहविष्यान्नंप्रचक्षते नवणीम
धुसर्पिषीतिपाठः हैमंतिकधान्यंकल्माषाः तदपिमितंस्वेतं अषिकंचहविष्यंकलायाःसतीनाःखण्डपर्यायाः मट
रइतिप्रसिद्धः वाटसाइतिमहाराष्ट्रभाषयाप्रसिद्धधान्यं वास्तूकंचटनबथुवाणाख्याशाकः हिलमोचकंमोचय

वं.
ता.
7

तीति तीरभुक्तेः प्राक् मालीहिला इति प्रसिद्धः प्राकः कालिग्रामकन्नादेशे कालिकेति प्रसिद्धं हिमगोवि
कागोडदेशे होलाचेति प्रसिद्धाः केमुकं केमुआ इति पूर्वदेशे प्रसिद्धं नागरं गरके मोरंग घेराचली नागरंगोनारं
पीभूमिजं शुकेत्यमरात् नागरं चेवेति पाठे नागरं शुण्ठी लवली रायमावले महामिमाषायां भाक्षपायमान
फलं हरकारेवडी तिमध्यदेशभाषायां अनेनैवपक्वमित्येनेन कथितं हरिविष्णा एतानि वस्तिपूष्यपत्रं मनु सुन
न्नानि पयः सोमो मांसं पञ्चान्नपक्वं अक्षारलवणं चैव पञ्चकमाहु विरुद्यते अन्नुपक्वानमपक्वं मय पूनाशुपयुक्तानि
वस्तूनि तत्र पंचरत्नान्याह दिनापुराणे सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकं रत्नपंचकमाख्यातं शेषं वस्तु वीथ
हकनकं कुलिशं नीलं पद्मरागं च मौक्तिकं एतानि पंचरत्नानि रत्नशास्त्रविदो विदुरिति समयप्रदीपएतकालि
कापुराणोक्तानि वाकुलिशं हीरकं स्यात् अन्यतरे अभावे सर्वरत्नानां हेमं सर्वत्र योजयेत् विष्णुधर्मोत्तरे मुक्ताफ
लं हिरण्यं च वैदूर्यं पद्मरागकं पुष्परागं च गोमेदं नीलं गारुत्मतं तथा प्रवालयुक्तान्युक्तानि महारत्नानि वैनव॥
हेमाद्रौ ब्रह्माण्डपुराणे अश्वत्थोडुम्बरप्लक्षन्यग्रोधपल्लवाः पंचभङ्गा इति प्रोक्ताः सर्वकर्मसु शोभनाः पंचभङ्गाः
पंचपल्लवाः पंचगव्यं तत्रैव स्कान्दे गोमूत्रं गोमयं क्षीरं दधि सर्पिर्यथाक्रमं विष्णुधर्मे गोमूत्रभागतस्त्वार्धं
शकृत् क्षीरस्य च त्रयं द्वयं दध्नो घृतस्यैकमेकश्च कुशवारिजः गोमूत्रादिपरिमाणमानतवरमाकृतम् पापस्थिन

मावेन्द्रेयं विस्नुधर्मे गायत्र्यादयगोमूत्रं गंधद्वारेतिगोमयं आप्यायस्वेतिचक्षीरं दधिक्राव्णेतिवैदधिः तेजोसिशुक्र
मित्याज्यं देवस्यत्वाकुशोदकं पंभिस्तु पंचभिर्युक्तं पंचगव्यंप्रवर्त्तते पंचामृतं हेमाद्रौ शैवधर्मे पंचामृतं दधिक्षीरं
सितामधुघृतं नृप मदनरत्ने कात्यायनः आज्यंक्षीरंमधुतथामधुरत्रयमुच्यते तच्चैवभविष्ये मधुराम्लश्चलवण
कषायतिक्तकटुकाख्याः कटुकस्तुतिराज्ञेद्राक्षावद्रुमुद्राहृते वहुःसमंगारुडे कस्तूरिकायाद्वौभागौचत्वारश्चंदनस्यच
कुंकुमस्यत्रयश्चैकंशशिनःस्याच्चतुःसमं शशीकर्पूरः कर्पूरंचंदनंदर्पःकुंकुमंचसमांशकं सर्वगंधमितिप्रोक्तं
समस्तसुरवल्लभम् दर्पःकस्तूरिका तथा कर्पूरमगुरुश्चैवकस्तूरीचंदनंतथा कंकोलंचभवेद्भिः पंचभिर्यु
क्तकर्दमः छंदोगपरिशिष्टे कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं वचाचंपकमुस्तंच सर्वौषध्योदशस्मृताः पाद्ये
त्र्यवल्लणराज्ञंवनिष्कावाज्ञातिधान्यकं विकारवच्चगोक्षीरंकुसुंभंकुंकुमंतथा लवणंचाष्टमंतच्चसौभाग्याष्टक
मुच्यते तृणराजेक्षुलालः कुस्तुंबुरुजीरकं आपःक्षीरंकुशाग्राणिदध्यक्षततिलास्तथा यवाःसिद्धार्थकाश्चेति स अर्घोष्टां
गःप्रकीर्त्तितः पंचरात्रे रजांसिपंचवर्णानिमंडलार्थंहिकारयेत् शालितंडुलचूर्णेनशुक्लंवायवसंभवं रक्त
कुसुंभसिंदूरगैरिकादिसमुद्भवं हरितालोद्भवंपीतंरजनीसंभवंतथा कृष्णंदग्धयवैर्हरितंपीतनकृष्णसंमि
श्रंरजनीहरिद्राकौसुंभकसंज्ञानि भविष्ये दूर्वायदूर्वापवांकुराश्चैववालकंचूतपल्लवाः हरिद्राद्वयसिद्धार्था

ग्रं॰ ता॰ ८

8

शिंशपापिप्पलोदुम्बरवटाः कंकणौषधयस्तेनाकोटकाः आनवस्मृताः सप्तमृदो मात्स्ये गजाश्वरथ्यावल्मीकसंगमाद्ध्र
दाद्गोकुलात् मृदमानीय कुम्भेषु प्रक्षिपेत्तत नवग्रहमखे गोकुलाद्वल्मीकसमचत्वरेणसह ह्रदाच्छ्रोतसो दोधवेति हेमाद्रौ भवि ष्यो
त्तरे ऐरावतगजेन्द्राच्च मारुकृतं तथैव च लोहचर्मणि पाषाणे तथा तन्त्रे सप्तवीहिताः आरक्तरंपिप्पलं तच्चैव षट्त्रिंशन्म
ते यवगोधूमधान्यानि तिलाः कंगुस्तथैव च श्यामाकं चीनकं चैव सप्तधान्यमुदाहृतं सप्तदशधान्यानि मार्कण्डेयपु
राणे व्रीहयश्च यवाश्चैव गोधूमाः कंगुकास्तिलाः प्रियंगवः कोविदाराः कोरदूषाः सतीनकाः माषा मुद्गा मसूराश्च
निष्पावाः सकुलत्थकाः आढक्यश्चणकाश्चैव गणाः सप्तदश स्मृताः कोरदूषाः कोद्रवाः सतीनकाः कलायः मट
र इति प्रसिद्धः नारदीये अष्टादशानि स्कान्दे यवगोधूमधान्यानि तिलाः कंगुकुलत्थकाः माषा मुद्गा मसूराश्च निष्पावाः
श्यामसर्षपाः गवेधुकाश्च नीवारा आढक्योऽथ सतीनकाः चणकाश्चणकाश्चैव धान्यान्यष्टादशैव तु हेमाद्रौ ली
रतामी मूलपत्रकरीराग्रफलकाण्डाधिरूढकाः त्वक्पुष्पं कवचं चेति शाकं दशविधं स्मृतं करीरं वंशांकुरः अग्रं पल
वः काण्डनालं कवकं छत्राकं कलशाख्यमाविद्ययर्मे हेमराजतताम्रश्च मृण्मयास्तत्र णान्विताः यात्रायां प्रतिष्ठा
दौ कुंभाः स्युरभिषेचने पंचाशांगुलवैपुल्या उत्सेधे षोडशांगुलाः द्वादशांगुलमूलास्तु मुखमष्टांगुलं भवेत् पंचत्रि
शांगुलं पंचाशतः आशापंचदशाधिकशतमङ्गुलानि वैपुल्यमित्यर्थः तातचरणाः केचित्तु पंचाशांगुलवैपुल्यमि

तार्थः प्रयाहुः प्रतिमाद्रव्यतत्परिमाणं हेमाद्रौ भविष्ये अनन्तकद्रव्यतत्संख्यां देवताप्रतिमां नृप सौवर्णीं राजतीं तेनाम्री
मृत्तज्ञामान्निकीर्तया विचक्षणापि कुलेपोस्यानिज्ञविज्ञानुरूपतः प्रामाणानल्पयं तावकर्त्तव्या शास्त्रावर्ज्जितैः अं
गुष्ठपर्वादारभ्य वितस्त्यवधिकास्मृता तथा अनन्तकसंख्यायत्र स्यात् शतमष्टोत्तरं स्मृतं मास्ये होमे ग्रहादिपूज्ञा
यांशतमष्टोत्तरं भवेत् अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते मदनरत्ने गारुडे यथानामवेदमन्त्रपत्रो ग्राह्यो नदर्शकारि
येत् यवानामिव गोधूमा व्रीहीणामिव शालयः आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते मंत्रस्य देवतायाश्च प्रजापति
रितिस्थितिः मंत्रस्य देवतायाश्च विधाने प्रजापतिर्देवता समस्तव्याहृतिमंत्रः स्मृतं तेऽपि नव्याहृत्या समस्त हूयते इति गा
रुडे प्रणवादिनमोऽन्तं च चतुर्थ्यन्तं च सत्तमम देवताया स्वकं नाम मूलमंत्रः प्रकीर्तितः केषांचित्प्रतिनिधिरुक्तो हेमाद्रौ
विष्णुधर्मे द्रव्यालाभे पयः कार्यं मध्वलाभे तथा गुडः घृतप्रतिनिधिं कुर्यात् पयो वा दधि वा नृप तत्रैव मैत्रायणीयपरि
शिष्टे दर्भाभावे काशः प्रतिनिधिः यष्ठीनस्तिः सर्वाभावे यवाः प्रतिनिधिः तत्रैव देवलः आज्यहोमेषु सर्वेषु गव्यमे
व भवेद्धुतं द्रव्यालाभे महिष्यास्त्वाजमाविकमेव च तदलाभे तु तैलं स्यात् तदलाभे तु जार्तिलं तदलाभे गतकौसुंभं तद
लाभे सार्षपं हेमाद्रौ परिशिष्टे कात्यायनः अनन्तगर्भकं साग्रं कौशं द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्र
चित् आज्यस्योत्पवनार्थं यत्तदप्येतावदेव च अश्वेयथाः पलाशाश्वत्थखदिररोहितोडुंबराः पालाशादर्भाभावे सर्वे वनस्प

वृं॰
तां॰
९

तीनां सर्वकंटकिवर्त्तनीयाणाहृतिर्होदशपर्वसूरिकाकारस्वादिनावेसवगर्भसूरिता देवेनतर्ल्यंनवहूयनेह
वि: संगारिणिस्वर्चिर्षिणावकेयणोनविषित्तुहोतव्यग्रोसंगारिणिवमानवः मेदाग्निरामयावीवदरिद्रश्चैवज्जायते
तस्मात्समिद्धहोतव्यनासमिद्धेकथंचन आरोग्यमिच्छतायुश्च श्रियमात्यन्तिकीं तथा गुहुर्थं चुहुते वेवणाग्निसू
पंखवादिभिः नजुर्यादग्निदमनं नेनजुर्यादधूननादिना मुखेनैव वदमेदग्निं मुखाद्ग्निरजायतेति श्रुतिः धूपधूपः
हेमाद्रौ भविष्ये अगुरुं चंदनं मुस्तां सिह्लकं वृषलं तथा समभागं तु कर्त्तव्यं धूपोयममृतान्वयः सिह्लकं सिह्ल
दशतिप्रसिद्धं वृषणं कस्तूरी तथा षडंगाकुष्ठो हिरण्यागुरुश्च लाक्षा च पंचधनाख्यसमभागः हरीतकीसर्जरसः
समांशे भागैकमनःशिलवशिलाजु चन्दनसवनारिक्षरस्यैकोथ धूपो दशांगः कथितो मुनींद्रैः सर्जरसः शालनिर्य
सिद्धः मांसीजटामांसी त्रिफलं त्रिभागं कर्पूरः पुरः गुग्गुलुः अथ सुवर्णमानं याज्ञवल्क्यः जालसूर्यमरीचि
स्थंत्रसरेणुरजः स्मृतं तेऽष्टौ लिक्षा तास्तिस्रो राजसर्षप उच्यते गौरस्तेत्रयः षट्ते यवमध्यस्तु ते त्रयः कृ
ष्णलापंचते माषस्ते सुवर्णस्तु षोडश पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितः राजनमानमाह हेमस्मले
हृण्यमाषोथ धरणः षोडशोवते: शतमानं तदृशभिर्धरणैः पलमेव तु निष्कः सुवर्णाश्चत्वारः इति ताम्रमान ९
माह कार्षिकस्ताम्रिकः पणइति पलं चतुर्थांशेन कर्षो मोम्मितः कार्षिकस्ताम्रसंबंधी पणो भवति क

9

षेसंज्ञस्तु वटस्ते षोडशमाषाः कर्षोऽस्त्रोपलं कर्षचतुष्टयमिति षोडशमाषोऽक्षः स च कर्ष इत्यर्थः धारणस्यैव पुराण इति सं
ज्ञान्तरं ते षोडश स्याद्धरणं पुराणश्चैव राजतमिति नितान्तरायांस्तैः शतमानेपलपर्यायः सुवर्णं चतुष्टयसमं तोलितं तु
पयाद्गृतो निष्क इत्यर्थः सुवर्णेनिष्कस्तु चतुः सौवर्णिको निष्को वित्तेपलप्रमाणतः इति मनूक्तः स च पलसमान एव
कोऽत्र कार्षापण इत्यपेक्षायां देशभेदेन कार्षापणो भिन्न इत्याह हेमाद्रौ नारदः कार्षापणो दक्षिणस्यां दिशि राज्यप्रवर्तते
पणैर्निबद्धः पूर्वस्यां षोडशैव पणास्तु षोडशपणाश्चैष्टादशकाकार्षापणः पूर्वस्यामित्यर्थः तावता लभ्यं चूर्णं दत्त्वा
स्यां स इति हेतुनिर्णये पितामहवचनात् लीलवत्यां वराटकानां दशकद्वयं यत्सा काकिणी ताश्च पणाश्चतस्रः ते षोड
श द्रम्मस्त्विह गम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः अथ धान्यमानं भविष्ये पलद्वयं तु प्रसृतं द्विगुणं कुडवं स्मृतं चतुर्भिः
कुडवैः प्रस्थः प्रस्थाश्चत्वारश्चाढकः आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः कुंभो द्रोणद्वयं शूर्पं खारी द्रोणास्तु षोड
श द्रोणद्वयस्यैव शूर्पं इति संज्ञा पलं च कुडवः प्रस्थश्चाढको द्रोण एव च धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणा द्रो
णैः षोडशभिः खारी विंशत्या कुंभ उच्यते कुंभैस्तु दशभिर्वाहो धान्यसंख्याप्रकीर्तिता विंशत्येव त्वापि द्रोणैरिति संवत्स
त्ते तथा च कुंभो द्रोणद्वयमिति निपुरस्त्वां द्विशतिर्द्रोणमितः कुंभ इति पर्यालं तरमेतेषां न्यूनाधिकपरिमाणं शाक्तिदेशकाला
पपत्त्याव्यवस्थाप्या अथ होमद्रव्यमानं सिद्धान्तशेखरे होमद्रव्यप्रमाणानि वक्ष्यन्ते यथाक्रमं कर्षप्रमाणानि

ग्रं॰
ता॰
९

त्रं स्यान्मधुक्षीरं च तन्मात्रं तंडुलानां शुक्तिमात्रं पायसं प्रसृतेः समं कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः अन्नं ग्रा
ससमं ग्राह्यं शाकं ग्रासार्धमात्रकं मूलानां तत्त्रिभागः स्यात् कंदानामष्टमोंशकः इक्षुः पर्वप्रमाणः स्यात् द्व्यंगुलद्वितयं लता
प्रादेशमात्रं ग्रासमिता व्रीहीणामंजलीसमाः तिलसक्तुकणादीनां मृगीमुद्राप्रमाणतः पत्रपुष्पफलादीनां प्रमाणाहुति
रिष्यते चंदनश्रीखंडकस्तूरीकुंकुमागरुकर्दमाः हरिमंथसमाः प्रोक्ताः गुग्गुलुर्बदरोपमः हरिमंथस्तु चणकः आहुती
10 नामिदं मानं कथितं वेदवेदिभिः स्यात् त्रिमुद्रा मृगीमुद्रा होमे सर्वफलप्रदेति मतांतरं शारदातिलकटीकायां पदा
र्थस्तिलके कर्षमात्रमिदं होमे शुक्तिमात्रं पयः स्मृतं उक्तानि पंचगव्यानि शुक्तिमात्राणि साधुभिः तत्समं मधुदुग्धेन्नं
ग्रासमात्रं सदाहुतं दधिप्रसृतमात्रं स्याल्लाजास्तु मुष्टिसंमिता पृथुकास्तत्प्रमाणास्तु सक्तवापि तथाविधाः पलार्द्धं
गुडमानं च शर्करापि तथाविधा मासोऽर्द्धमात्रमन्नानामिक्षुः पर्वप्रमाणकः पर्वं स्यात्तत्र पुष्पं च तथा धूमादिकल्पये
त् मानलिंगं च नः खंडं पनसं दशधाकृतं अष्टधा नारिकेलं च चतुर्द्धा कदलीफलं त्रिधाकृतं बल्वं वै त्वेकं पिस्यात्तु विड्
तेद्विधा व्रीहयो मुष्टिमितास्तु मुद्गमाना यवास्तथा तंडुलास्सर्षपद्वंशाः श्यामाकोद्रवा मुष्टिसंमिताः लवणं शुक्तिमात्र
स्यान्मरीचान्येकविंशतिः घृतस्य कर्षिको होमो तीरस्य मधुनस्तथा शुक्तिमात्राहुतिर्दध्नः प्रसृतिः पायसस्य तु खंड १०
त्रयं तु मूलानां फलानां स्वप्रमाणतः ग्रासमात्रं तु होतव्यान्नं तेषां तु तंडुलाः अक्षतास्तु यवा प्रोक्ताः अभावे व्रीहयः

स्मृताः तदभावे तु गोधूमास्तथा खंडितनतंडुलाः येषां केषांचिद्वा तेषां द्रव्याणाम संभवे सर्वं चाज्यमुपादेयं भास्कराज्जन्तुनेर्म
नात् सर्वप्रमाणमाहृत्या पंचांगुलं शहोतव्येति चर्वेन्न स्रुमाणिपंचपंच दलाग्राणि पर्वकं मानं स्त्रेतानामंगुलद्वयं चंदनं
दनकाश्मीरकस्तूरीयक्षकर्दमान् कलायसंमितानेतानागुलेवदरास्थिवत् द्रव्यं स्रुवेणाहोतव्यं पाणिनाकठिनं हविः
स्रुवपूर्णाद्रवाःप्रोक्ताकठिनास्तग्रमात्रकाः व्रीहयो यवगोधूमप्रियंगुयवशालयः शूर्पेणैव च होतव्यास्तेषां च तंडु
ला अथ निग्वरणं हेमाद्रौ पाद्मे वालाग्निहोत्रिणं विप्रं स्वत्वपंचगुणान्वितं सपत्नीकं च संपूज्य भूषयित्वा च भूषणैः पुरो
हितं मुख्यनमंक्रतान्वांस्तुतपार्विज्ञः चतुर्विंशाद्गुणोपेतान्सपत्नीकान्निमंत्रितान् अर्हंतार वरसंछन्नान्स्रग्विणःशुचिभू
षितान् अंगुलीयकानि च तथा कर्णवेष्टान्प्रदापयेत् तथैव स्त्रैणं वस्त्रयुग्मं यथोल्लीषकुंडलीकंठभूषणं अंगुलीभूष
णं चैव मणिबंधस्य भूषणं एतानि चैव सर्वाणि प्रारंभधर्मकर्मणा पुरोहिताय दत्वाथ ऋत्विग्भ्यः संप्रदापयेत् पू
र्वोक्तभूषणान्सर्वं स्तासीषं वस्त्रसंयुतं दद्यादेतत्त्रयोन्यभ्यः याच्छादतपदं तथा व्रतानां मधुपर्कमाह तत्रैव विश्वामित्रः त
पूजा मधुपर्केण ऋत्विजः कर्मकारयेत् अपूज्य यत्कर्म कारः किल्बिषेनैव युज्यते ऋत्विजां संख्यामाह तत्रैव मात्स्ये हेमा
लंकारिणः कार्याः पंचविंशतिऋत्विजः इत्येवसमं सर्वानाचार्यो ह्विगुणो भवेदिति इति णायानोषयेदित्यर्थः अथ
सर्वतोभद्रमण्डले हेमाद्रौ स्कांदे प्राग्दीच्यांगतारेखाऊर्ध्वादेकोनविंशतिः त्रिंडंड्रस्त्रिपदःकोणाङ्कृत्वलांपंचमि

ग्रं॰ ता॰ ११

पदैः एकादशपदावलीभद्रं तेन नवभिः पदैः चतुर्विंशत्पदा वापीपरिधिर्विंशतिपदैः मध्ये षोडशभिः कोष्ठैः पद्मम् अष्टदलं
स्मृतं श्वेतेन शृंखला कृष्णावल्ले नीलेन पूरयेत् भद्राः रक्ताः सिता वापी परिधिः पीतवर्णकः वाह्यांतरदलं श्वेता कर्णिका पी
तवर्णिका परिधाने विहितं पद्मं वाह्ये सत्वरजस्तमः तन्मध्ये स्थापयेद् देवान् ब्रह्माद्यांश्च सुरासुरान् इति सर्वतोभद्रं अ
थ लिंगतोभद्रमाग्नये चतुर्विंशतिरालेख्या प्राक्दक्षिणायताः कोणेषु शृंखला पंचपदा वल्ल्यः पार्श्वतः पदैर्न व
भिरालेख्याश्चतुर्भिर्लघुशृंखलाः लघुवल्ल्यः पदैः षड्भिः ततोऽष्टादशभिः पदैः कृत्वा लिंगानि वाप्यस्तु त्रयोदशभिरंतरा त
तो वीथी द्वयेनैव पीठं कुर्याद् द्विवर्त्मणः तस्य पदानि पंच पदा द्वारान्यपि तथैव च एकादशानि पदमध्ये पद्मं स्यात् लिंगमुच्यते
कोणेषु शृंखलां कार्या पदैस्त्रिभिरतः परं पदैश्चतुर्भिः दिक्षु सप्तभद्राण्येषां समं ततः एकादशपदा वल्ली मध्ये अष्टदलमा
लिखेत् पद्मं तं वपदं स्याद् एवं लिंगतोभद्रमुच्यते शृंखला कृष्णवर्णेन वल्ली नीलेन पूरयेत् रक्तेन शृंखला लघ्वी वल्ले
पीतेन पूरयेत् लिंगानि कृष्णवर्णानि श्वेतेनाप्यवापिकाः पीठं तं पाद्यं श्वेतेन द्वाराणि तेन द्वारस्थरण्यां मध्यस्थः शृंखला
रक्तावली नीलेन पूरयेत् भद्राणि पीतवर्णानि पीतानां कंजकर्णिकाः दलानि श्वेतवर्णानि पद्मादिविभागानि कल्पयेत् निसो
रेखा वहिः कार्या सिता रक्ता सिता क्रमादिति अथ चतुर्लिंगोद्भवे लिंगे रेखा लक्ष्य द्वाशाप्तानाचतुः लिंगसमुद्भवे कार्या ११
द्विः पदः श्वेतस्त्रिः [illegible] शृंखलाः वल्लीः सप्तपदा नीला भद्रं रक्तं चतुष्पदम् भद्रपार्श्वे महाकृष्णे स्यामष्टादशैः पदैः

शिवस्य पार्श्वतो वापि ऽष्टौ तं च पदांसितं पटमेकं तथा पीतं भद्रं वाप्यो तु मध्यतः शिरसि शृंखलायास्तु ऊर्ध्वं पीतं पदत्रयं लि
गानां स्कंधतः कोष्ठा विंशती रक्तवर्णकाः परिधिः पीतवर्णस्तु पदैः षोडशभिः स्मृतः पदैस्तु नवभिः पश्चाद्रक्तं पद्मं सकर्णिकं
अथ द्वादशलिंगोद्भवं तथैव प्राग्दक्षिणायतो रेखाः षड्विंशति प्रकल्पयेत् पदानि द्वादशगतं -- विंशतिरेव च खंडेंदुश्चि
पदाकोणे शृंखलाषट्पदस्मृता त्रयोदशपदा वल्ली लिंगमष्टादशे स्मृतं लिंगत्रयस्य पंक्तौ तु शोभा कोष्ठास्तु दश तेषाम
परिपंक्तौ तु कोष्ठाः सप्तदशैव तु एतायां पंक्तिस्तु विज्ञेया परितः परिकल्पिताः एतायां पंक्तौ नवपंक्तौ कोष्ठाद्याशीतिसंख्यया
परिधिः स च विज्ञेयो मंडलस्यांतरा दृश्यो परिध्यंतरकोष्ठेषु सर्वतोभद्रमालिखेत् विशेषश्चात्र विज्ञेयः शृंखलाषट्पदाभ
वेत् त्रयोदशपदा वल्ली भद्रं तु नवभिः पदैः पंचविंशत्पदा वापी परिधिः षोडशात्मकः मध्ये नवपदं पद्मं कर्णिकाकेसरा
न्वितं सत्वं रजस्तमो वर्णा परितो मंडलस्य तु त्रयः परिधयः कार्यास्तत्र द्वाराणि कारयेत् सितं तु शृंखलाकस्या वल्ली नी
लाय कीर्तिताः भद्रं वै वारुणं ज्ञेयं वापी स्यात् श्वेतवर्णिका लिंगानि कृष्णवर्णानि पार्श्वतो द्वादशैव तु परिधिः पीतवर्णं
स्यात्कमलं पंचवर्णकं इति लिंगतोभद्रमंडलानि अथ मंडलदेवताः तत्र मध्ये ब्रह्माणं ब्रह्मजज्ञानं गोतमो वामदेवो ब्रह्मा
त्रिष्टुप् ब्रह्मस्थाने पूजने विनियोगः एवमग्रेपि ब्रह्मजज्ञानं तत उदीचीमारभ्य वायवीपर्यंतं सोमादयो वायव्यंता अष्टौ
लोकपाला स्थापनीयाः तत्र आप्यायस्व गोतमः सोमो गायत्री ॐ आप्यायस्व समेतु ते ... गतः श्रुतं ऋषिः ईशानो जग

ग्रं॰ नीऽश्वभिनादेवसविता इंद्रोवामयुक्तं दा इंद्रोगायत्री इंद्रंवो विश्वतः अग्निकाण्वोमेधातिथिरग्निर्गायत्री अग्निं दूतं यमाय सो
ता॰ मयमानुष्टुपमायसो मं मोषुणोघोरः काण्वोनिऋतिर्गायत्री मोषुणः तत्वायामि शुनःशेपपोवरुणस्त्रिष्टुप् तत्वाया
१२ मि वायोशतंगोतमोवायुरनुष्टुप् वायोशतं वायुसोममध्ये अष्टौवसून् लपायत्रः मैत्रावरुणोवसिष्ठोवसंस्त्रिष्टुप् ल
12 पायत्रः सोमेशानमध्ये एकादशरुद्रान् आरुद्रासःश्यावाश्व एकादशरुद्रास्त्रागती आरुद्रासः ईशाने मध्ये द्वादशा
दित्यान् त्यान्नु क्षत्रियं मंदो मत्स्यो द्वादशादित्यागायत्री त्यान्नु क्षत्रियान् इंद्राग्निमध्ये अश्विना राहूगणो गोतमो अश्विनावसि
ष्ठश्विनावश्विनौः अग्निपमध्ये विश्वेदेवान् सपैन्द्रकान् ओमासेमधुच्छंदाः विश्वेदेवागायत्री ओमासः यमनिऋतिम
ध्ये सप्तमरुतान् अभित्यंदेवसवितारमोण्योः कविक्रतुमर्चामिप्रायंमतिकविरू धायस्यामतिर्भा अदिद्युतत्सवीमनि
हिरण्यपाणिरमिमीत सुक्रतुः कृपास्वः निऋतिवरुणमध्ये भूतनागान् अयंगौः सर्पपत्नीसर्पोगायत्री अयंगौः वा
रुणवायुमध्ये गांधर्वाप्सरसः अप्सरसामेनमग्ने ऋष्यशृंगोगांधर्वोप्सरसोऽनुष्टुप् अप्सरसांगंधर्वाणां ब्रह्मसोममध्ये स्कंध
नंदीश्वरशूलमहाकालान् कुमारंमातासंनयिष्त्रिष्टुप् कुमारंमाता ऋषभ भऋषभोवैराजो ऋषभोऽनुष्टुप् ऋषभंमा
ब्रह्मेशानमध्ये दक्षादीन्प्रजापतीन्लोकोयोहूहस्पतिर्दक्षोऽनुष्टुप् अदितिर्ह्यजनिष्ट ब्रह्मेन्द्रमध्ये दुर्गा विश्वंच तामग्नि
वर्णां सोभरिर्दुर्गात्रिष्टुप् तामग्निवर्णां इदंविष्णुः काण्वोमेधातिथिर्विष्णुर्गायत्री इदंविष्णुः ब्रह्माग्निमध्ये स्वधांव २

दीरतां गोत्रः स्वधा वैष्टुप् उदीरतामवरन्तुताः ब्रह्मय नमध्ये मृत्युर्योगा नवयं मृत्युः संकल्पको मृत्युरोगास्त्रिष्टुप् परमं त्योमृत्यु वरे
ब्रह्मनिऋतिमध्ये गणनायकं पति गणानां त्वा मृत्समदो गणपतिर्जगती गणानां त्वा ब्रह्मवरुण आपोशुन्नो वरीषः सिंधुद्वी
पऋष्यापो गायत्री ॐ शन्नोदेवी ब्रह्मवायुमध्ये मरुतः मरुतो यस्य हु गणो गोतमम महतो गायत्री मरुतो यस्य ब्रह्मणः पा
दमूले कर्णिकाधः पृथिवी स्योनामेधातिथिर्भूमिर्गायत्री स्योना पृथिवि नमस्व गंगादित्रयः इमं मे सिंधुस्तिस्त्रय मेधाग्नि
गायत्मनामहे रवाणोर्जगती इमं मे गंगे यमुने तत्रैव समस्तागतानधास्त्रो राजन्सततो वरुणो त्वं च यदापो अघ्न्या इति वरु
णेति शुनामहे ततो वरुणानोमं च मपि वायो मोषधीहि सीरतो विश्वस्त्वायाम्भः सत्वेनतो वरुणातोमं च नडुपरिमे स्वेनः
इति नाम्ना मेरुं ततो मंडलाद्बहिः सोमादिसमेपेतब्रह्मेणगोत्रमः भारद्वाजं विश्वामित्रं काश्यपं जमदग्निं वसिष्ठं अ
त्रिं अरुंधतिं तद्बाह्ये सर्वादि ऐंद्री कौमारी ब्राह्मी वाराही चामुंडां वैष्णवीं माहेश्वरीं विनायकीं इत्यष्टौ शक्तयः
प्रतिष्ठाप्य प्रत्येकं सह वा पूजयेत् इति मंडलदेवता अथ पवित्रलक्षणानि हेमाद्रौ संग्रहीकृत्य हस्तो होकिं वित्तं कृवि
तांगुली नकुलीतु तमालाख्या तापक जंपतत्तेव ता पूर्वोक्ताम्नु कुलीया वषदेशानि रत्नागुलिः आकोशमनुखड्डाग्रकु
लाय मवदांय दर्शयेत् अंगुष्ठं च वितानतो ह स्वकीयांगुलि विच्छिन्नो अग्रो वा विभिन्नो वाहलायोज्जयित्वा तु निष्ठुरा तत्रान्या
कुं विनेकनानये वं चकमीयसी अथो नाथो गृहनाथा स्थितामध्ये करस्यतु ततस्तत्र स्थिताः पृष्ठे अंगुष्ठ वेकतः कु

अं॰
ता॰
१३
13

नालं ध्यवस्थितौ ह्येव ध्यामन्त्रस्याग्रकीर्तिता तदन्तरे सर्वदेवतापूजने साधारणेन घण्टमुद्राऽऽख्याते देवतातेन संतुष्टा सर्व
दा सन्निधीभवेत् अंगुष्ठौ निक्षिपेत्तस्येयं मुद्रा त्वावाहनी मता संग्रणानि दिशेत्तस्येयं मुद्रावाहनी स्मृता अधोमुखीति यं
चैतस्यात् स्थापनी मुद्रिका मता उच्छ्रितांगुष्ठौ तौ कुर्यात्तु स्वालीकारणी भवेत् प्रसृतांगुलिकौ हस्तौ मिथः श्लिष्टौ तु सं
मुखैः कुर्यात्सा हृदये सेयं मुद्रा प्रार्थनसंज्ञिका इत्येवं सर्वदेवानां पूजने षट्प्रदर्शयेत् शिवपूजने लिंगमुद्रा उच्छ्रि
तं दक्षिणांगुष्ठं वामांगुष्ठेन बंधयेत् वामांगुलीदक्षिणाभिरंगुलीभिश्च वेष्टयेत् लिंगमुद्रेयमाख्याता शिवासान्निध्य
कारिणी स्त्रीकामः श्रीसिद्धौ वीतरागस्य कामस्तु नेत्रयोः मुखे धनाद्यकामस्तु ग्रीवायां रोगशांतिकृत् हृदये सर्वकामे
वस्तु नाभ्येन नाभिमण्डले राज्यकामस्तु गुह्ये वै राष्ट्रकामस्तु पादयोः रामपूजने तु प्रदर्श्या मुद्राः तथा च रामार्चने च वंदि
कायामगस्त्यः आवाहनी स्थापनी च सन्निधीकरणी तथा स्वसंनिरोधनी मुद्रा संमुखीकरणी तथा सकलीकरणी चैव
महामुद्रा नैवेद्य शंखचक्रगदापद्मधेनुकौस्तुभगारुडाः श्रीवत्सवनमाली च योनिमुद्रां प्रदर्शयेत् एताभिः संप्रदर्श्या
भिर्मुद्राभिस्तु विचक्षणः योरामममंत्रं यत्रिसंमोदयन्सुरेश्वरं द्रावयेदपि विशिष्टं नत आर्थितमाप्नुयात् मूलाधाराद्हृ
दयांतमानीतकुसुमांजलिः विश्वानगततेजोभिः विनीतः प्रथमादिषु आवाहनीयं मुद्रास्याद्देवार्चनविधौ मुने अं १३
गुष्ठगर्भिणी सैव मुद्रा स्यात्सन्निरोधिनी उत्तानमुष्टियुगला संमुखीकरणी मता अंगैरेवांगविन्यासः सकलीकरणी भवेत्

अन्योन्यांगुष्ठसंलग्ना विस्तारितकरद्वये महाम्बुजेयमाख्याता नूनमधिकसमापनी कनिष्ठानामिकामध्यानेन स्यांगुष्ठान
द्यतः गोपितांगुष्ठमूलेन सततं ह्वाम्बुकुलीकृता करद्वयेन मुद्रा स्यात् खाखेयं स्वरार्चने अन्योन्याभिमुखस्पर्शी ख्यत्य
यं नत्वे वेष्टयेत् अंगुलीभिः प्रयत्नेन मंडलीकरणा मुनेः वक्रमुद्रेयमाख्याता गदामुद्रा ततः परं अन्योन्याभिमुखाश्लि
ष्टः ततः कौस्तुभसंस्थिता कनिष्ठेन्योन्यसंलग्नाभिमुखविहिपरस्परं वामस्य तर्जनीमध्ये मध्यानाकेकयोरपि वामा
नामिकसंस्पृष्टा तर्जनी मध्यपृष्ठाभिता पर्यायेणानतांगुष्ठद्वयी कौस्तुभलक्षणाः कनिष्ठान्योन्यसंलग्नाविप
रीतं वियोजिता अथ स्तनायापितांगुष्ठा स्वहस्तागाकुंचितकाः तर्जन्यंगुष्ठामध्यस्याम मध्यमानामिकाद्वयी कनिष्ठा
नामिकामध्यतर्जन्यग्रकरद्वयी मुनीश्रीवत्समुद्रेयं वनमाला भवेत्ततः कनिष्ठानामिकामध्यामुष्टिकृत्वा तत
र्जनी परिधानाग्रे संश्लेषतर्जनीभ्यां दिवोनतः योनिमुद्रा समाख्याता योतत्करद्वयाश्रिता तर्जन्याकृष्टम
ध्यांते स्थितानामिकयुग्मिका मध्यस्थलस्थितांगुष्ठा पर्येषु स्नानमुनर्वेत्ते श्रालाश्च नेवेमिश्रति इति मुद्रालक्षणं
अथोपचाराः सदा षोडशे ज्ञानमालायां अष्टत्रिंशत्षोडशवादशपंचोपचारकाः तान्विभज्य प्रवक्ष्यामि केनेनैव
क्रमेण स्फुकिं अर्घ्यं पाद्यमाचमनं मधुपर्कमुपस्पृश्य स्नानं नीराजनं वस्त्रमाचमनोपवीतकं पुनराचमनं भूषं दर्प
णालोकनं ततः गंधपुष्पं धूपदीपौ नैवेद्यं च ततः क्रमात् पानीयं नायमार्यामंहत्सवातस्ततः परं हस्तवासः

ब्रं·
ना·
१८

14

करोद्वर्तनं तांबूलमनुलेपं च पुष्पदानं पुनः पुनः गीतं वाद्यं च नृत्यं स्तुतिश्चैव प्रदक्षिणं पुष्पांजलिनमस्कारा च
षट्त्रिंशात्समीरिता इत्यष्टत्रिंशात् आसनं स्वागतं वार्घ्यं पाद्यमाचमनीयकं मधुपर्कोमनस्नानं वसनाभरणानि च ॥
सुगंधासुमनोधूपोदीपनैवेद्यतर्पणं माल्यानुलेपनं चैव नमस्कारविसर्जने इति षोडश अर्घ्यं पाद्याचमानेव
मधुपर्काचमनान्यपि गंधादयो निवेद्यांता उपचारा दशक्रमादिति दश गंधपुष्पौ धूपदीपौ नैवेद्यं चमनं स्मृतमि
ति पंच शारदातिलके षोडशोक्ता तथाप्यासनं स्नानं वस्त्रं भूषणानि परित्यज्य द्वादश महाकपिलपंचरात्रे गं
धतैलमयोदयाद्देवस्य प्रतिमं ततः पूर्वाव विष्टकांतां च श्यामाकं पद्ममेव च पाद्यांगानि चत्वारि कथितानि समास
तः कर्पूरमगुरुं पुष्पं द्रव्याणाचमनीयके सिद्धार्थान् क्षतं चैव दूर्वां च तिलमेव च पंचगंधफलं पुष्पं अंमशृंगं त्वर्घ्ये स्मृ
ते स्नानं वस्त्रं तथा भक्ष्यं द्रव्यादाचमनीयकं [illegible]नमपि तत्रैव रजनी सहदेव च शिरीषं लक्ष्मणापि च महासुष्ठ
कुमारी ऋद्धिमुद्वर्तनमिहोच्यते मंत्रतंत्रप्रकाशे अक्षता गंधपुष्पाणि स्नानपात्रे तथाबूयं तत्रैव द्रव्याभावे प्रदा
तव्याः शालितण्डुलाश्च भाः [illegible] तथा चमनपात्रेपि द्रव्या जातीफलं त्वने लवंगमपि कंकोल
शास्लमाचमनीयके तत्र द्रव्यालाभे तं ग्रामरे तंडुलान्निक्षिपेत्तत्र द्रव्याभावेन सन्त्ररन् प्रयोगपारिजाते व्यासः प्रति
मापट्टयंत्राणि नित्यस्नानं कारयेत् कारयेन्नवेद्यविशेषदा वा मलधारणं स्नानमालापो नाहतैरर्चयेदि स्त्रं १८

नवलस्यागणाधिपं नद्दूर्वयायज्ञेहेवींबिल्वपत्रैर्दिवाकरं ॰ उमामनर्कपुष्पांचविष्णोर्वज्रैर्णौस्सदाबुधैः ॥ स्वहस्तातस्त्वयवायो
त्काद्गतियाः ॥ यदर्शोउक्तं तायवानामेवायंप्रतिषेधानतंडुलादीनां नंत्रोक्ते ॥ महाभिषेकंसर्वत्रशोखैनैवप्रकल्प
येत् सर्वचैवप्रशस्तोक्तं ॥ शिवस्यार्चनेविनेतिविल्वरत्नताल्वरणाकृते ॥ आचारमयूषेदृष्टव्यः ॥ अथव्रतोद्यापना
नक्रोविधिः ॥ कृष्णोवन्दावयेनन्दीपुराणे ॥ कुर्यादुद्यापनंतस्यसमामामायद्दीरितं ॥ उद्यापनंविनायत्तुव्रतंकृतंनिःफलंभ
वेत् ॥ विज्ञानुसारतोरव्यानदमुक्तोद्यापनेव्रते ॥ गांचैवकांचनंदद्याद्व्रतस्यपरिपूर्त्तये ॥ समाभाद्युद्यापनेचक्तोद्यापन
विषयं उक्तोद्यापनेत्वद्यादोमध्यप्रयाणेत्वे व्रतस्योद्यापनंभवेत् इतिवचनात् त्रितयत्रापि ॥ अथव्रतभंगेसंपूर्णता
विधिर्हेमाद्रौभविष्ये ॥ युधिष्ठिरउवाच ॥ संपूर्णतामद्दष्टानांव्रतानांवजनार्दन ॥ अरुप्रसादपुरुषार्थमेतन्मेवक्तुमर्ह
सि ॥ श्रीकृष्णउवाच ॥ साधुसाधुमहाबाहोकुरुराजायुधिष्ठिर ॥ रहस्यानांरहस्यंतेकथयामिव्रतंतव ॥ संपूर्णताख्यं
नायव्रतमस्यकालदंभवेत् ॥ पत्नीर्णानरनारीभिर्भवेत्संपूर्णकारकं ॥ श्रवणंतनत्तुकर्त्तव्यंसंपूर्णफलकांक्षिणः ॥ किं
चिद्गुणंप्रमादेनयद्व्रतंव्रतिनास्थितं ॥ तत्संपूर्णंभवेत्सर्वंव्रतेनानेनपांडव ॥ उपदंशविहिविधेर्महामाहात्म्यपांडव ॥ यद्व्र
किंचिदत्रैवव्रतंविघ्नविनाशनं ॥ तत्संपूर्णंभवेत्सर्वंसत्यंनसंशयः ॥ कांचनंरूप्यकंरूपंशाल्यन्नानिवदापयेत् ॥ भ
ग्रव्रतस्ययोदेवस्तस्यरूपंविनिर्मितं ॥ व्रतंस्तोतुंसयार्थांप्राप्यंयदुक्तंकिल ॥ नवनिष्पादितंकिंचिद्देवात्सर्वंतथास्थितं

व्रं॰
ता॰
१५
15

द्विभुजं पंकजाहस्तं सौम्यं प्रहसिताननं निद्राहितां शिल्पितां च तस्मिन्नेव दिने पुनः तस्मान्नेव पुनः प्राप्ते ब्रह्मणो विधि
ताहृद्धे स्नापयेत्तस्य स्नात् आश्रुत सोदशमांबुधिः गंधचंदनपुष्पैश्च पूजां कुर्यात्समाहितः तोयपूर्णस्य कुंभस्य स्वे विन्य
स्य देवतां धूपदीपादिभिर्नैवेद्यै रत्नैः बहुप्रकारकैः श्रद्धया प्रदद्यात्तन्मात्रं मंत्रेणानेन पांडव उपाध्यनस्य दानं प्रायश्चित्तं
कृतं ज्ञाने अज्ञाने वा प्रपन्नस्य कुरुष्वायं दद्यात् पुनः प्रसन्नो भव भीतस्य भिन्नवर्षव्रतस्य च कुरु प्रसादं तं पूर्णं व्रतं संज्ञा
यते मम जपच्छिद्रं तपःछिद्रं यच्छिद्रं यज्ञकर्मणि तत्सर्वं त्वत्प्रसादेन संपूर्णं जायतां मम पूर्वे दक्षिणपश्चात्तु उत्तरे
च बलिं हरेत् उपर्यधस्तात्सर्वेभ्यो दिक्पालेभ्यो नमो नमः इदमर्घ्यमिदं पाद्यं तेभ्यस्तेभ्यो नमो नमः पादौ च ज्ञानुनी
चैव कटिशीर्षकवक्षसी ऊर्ध्वं विवष्टं पृष्ठं वाकच्चलस्य शिरोरुहान् पूजयित्वा स देवस्य ततः पश्चात्समापयेत्
शृंगिनस्त्रेय यथाशाह्नानमस्ले त्वह्नरोत्तम ऐहिकामुष्मिकी देवकार्ये सिद्धिर्दिशस्व मे एवं समापयित्वा तु देवं प्रवि
धानतः तस्मै निर्यद्द्विजातिभ्यो विधिवत्प्रतिपादयेत् स्थितास्त्वो विप्ररूपी या हे भपाणिना विप्रहस्ते प्रयच्छे च वदा
ता चैवान्नदानवः मंत्रेणानेन कौंतेय सोपवासः प्रयत्नतः इदं व्रतं मया चीर्णं एतं मा सीदतु राहि द्विज तत्सर्वं पूर्णं
मेवास्तु तव मूर्ति प्रदानतः ब्राह्मणाधिप्रयच्छेत मंत्रेणानेन तद्व्रतं वाक्य पूर्णं मम पूजा च नेनानेन तेपुरा संपूर्णं ५
स्यात्प्रसादेन तव पूर्णमनोरथाः ब्राह्मणाय सुवर्णं येते तन्मन्येने दिवौकसः सर्वदेवमया विष्णो नन्दवनमयथा

ततयिः स्नातां मीतः पावकः सर्वभक्षतां सहस्रनेत्रः शक्रोपि पूतां विधिमेमहात्मभिः ब्राह्मणानांतु वचनात् ब्रह्महत्या
विनश्यति अश्वमेधफलं स्नात्वा लभंते नात्र संशयः व्यासवाल्मीकिवचनात् पराशरवसिष्ठयोः गर्गगौतमधौम्यानां विश्व
मित्रांगिरसस्तथा वचनान्नारदादीनां पूर्णं भवतु मे व्रतं एवं विधिविधानेन गृहीत्वा ब्राह्मणो व्रजेत् ततानंतरं विषये
सर्वं ब्राह्मणस्य गृहे ततः ततः पंचमहायज्ञान् निर्वर्त्य होमनाह्निकं एवं यः कुरुते भक्त्या व्रतमेतन्नरोत्तम तस्य संपूर्ण
तां याति तद्व्रतं पांडुराजकृतं खंडसंपूर्णतां याति प्रसन्ने व्रतदेवते भग्नानि यानि मन्मोहवशाद्गृहीतानि जन्मांतरेषु पि
तेन समन्त्रेण पूजनपरस्य पूरा भवंति सर्वव्रतानि परिपूर्णफलप्रदानि अथ सर्वव्रतेषु सामान्यतः पूजाविधिः
धिः सहस्रशीर्षेत्यावाहनं आगच्छ देवेशि तेजोराशे जगत्पते क्रियमाणां मया पूजां गृहाण सुरसत्तम पुरु
षएवेत्यासनं नानारत्नसमायुक्तं कार्तस्वरविभूषितं आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां एतावानिति पा
द्यं गंगादिसर्वतीर्थेभ्यो मयाप्रार्थनयाहृतं तोयमेतत्सुखस्पर्शं प्रतिगृह्यतां त्रिपादूर्ध्वेत्यर्घ्यं नमस्ते देवदे
वेशान नमस्ते धरणीधर नमस्ते कमलाकांत अर्घ्योयं प्रतिगृह्यतां ब्रह्मादिविराडित्याचमनीयं कर्पूरवासितं तोयं
मंदाकिन्याः समाहृतं आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः यत्पुरुषेणेति स्नानं गंगा च यमुना चैव नर्मदा
च सरस्वती तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमागतं तोयमेतत्सुखस्पर्शं स्नानाय प्रतिगृह्यतां तं यज्ञं

ब्रं॰ ता॰ १६ मितिवस्त्रं सर्वभूषादिके देवलोकलज्जानिवारणे मयोपपादिते नु भक्त्या वाससी प्रतिगृह्यताम् नमस्ते यज्ञसर्वज्ञ तन्तुभूतेन मि
तियज्ञोपवीतं दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् ब्रह्मसूत्रं सूत्रेशं गृहाण पुरुषोत्तम नमस्ते यज्ञसर्वज्ञ स्तुति
मं धम्मील्लवं चंदनं दिव्यगंधाढ्यं सुमनोहरं विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यतां नमस्ते स्वाशक्ति पुष्पं माल्यादीनि
सुगंधीनि मालत्यादीनि वै प्रभोः मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां यत्पुरुषमिति धूपं वनस्पतिरसोद्भवो
गंधाढ्यो गंध उत्तमः आघ्रेयः सर्वभूतानां धूपोऽयं प्रतिगृह्यतां ब्राह्मणोऽस्येति दीपं साज्यं च वर्त्तिसंयुक्तं वह्निना योजि
तं मया दीपं गृहाण देवेश त्रैलोक्यतिमिरापह चंद्रमा इति नैवेद्यं अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं भक्त्या भो
ज्यसमायुक्तं नैवेद्यं प्रतिगृह्यतां इदं फलं महादेव स्थापितं पुरतस्तव तेन मे सकलावाप्तिर्भवेज्जन्मनि जन्मनि
नाभ्या आसीदिति ताम्बूलं पूगीफलं समायुक्तं नागवल्लीदलैर्युतं कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यतां सप्तास्याs
न्निति दक्षिणा हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदं अतः शांतिं प्रयच्छ मे चंद्रादित्यौ च धरणी
विद्युदग्निस्तथैव च त्वमेव सर्वज्योतींषि आर्त्तिक्यं प्रतिगृह्यतां इति नीराजनं यज्ञेनेति पुष्पाञ्जलिः नमस्ते पुंडरी
काक्ष नमस्ते सुरप्रिय नमस्ते कमलाकान्त वासुदेव नमोऽस्तु ते यानि यानि च पापानि ब्रह्महत्यासमानि च ता १६
नि तानि प्रणश्यंति प्रदक्षिणं पदे पदे इति प्रदक्षिणा नमः सर्वहितार्थाय जगदाधाररूपिणे साष्टाङ्गोऽयं प्रणामस्ते

प्रयत्नेन मया कृतम् [illegible] नमस्कारः इति सामान्य [illegible] धेः इति श्रीमीमांसकनीलकंठभट्टात्मजभट्टशंकरकृतौ व्रतार्के परिभा
षासमाप्तः ज्ञगच्छुक्लेषेनमः अथादौ प्रतिपत्कृत्यानि मात्स्ये वर्जयित्वा मधौ यस्तु दधिक्षीरघृतैक्षवं दद्याद्वस्त्राणि सूक्ष्मा
णि पात्रैर्युतानि च रसपात्रैर्द्धूपादिपात्रे संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति हेमाद्रौ पाद्मे वर्जयेच्चैत्रमासे तु य
स्तु गंधानुलेपनं शुक्तिं गंधभृतां दद्याद्विप्राय श्वेतवाससी भक्त्या तु दक्षिणां दद्यात्सर्वकामार्थसिद्धये गंधदानवस्त्रदानमं
त्रौ नंदनतावासमंदारसर्वेष्टं दारकार्चित चंदनं नन्नु सादाम्ने सांद्रावंद्यप्रदो भव शरणं सर्वलोकानां लज्जया रक्षणं परं
सुवेषधारितं वस्त्रं तस्मात् शान्तिं प्रयच्छ मे इति मंत्राभ्यां गंधवाससी दद्यात् अथ चैत्रप्रतिपदि संवत्सरारंभविधिः ब्राह्मे अथ
प्रतिपत्सूर्योदयव्यापिनी ग्राह्या श्रीभगवानुवाच चैत्रमासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि शुक्लपक्षे समग्रं तु तदा सूर्योद
ये सतीति ब्राह्मात् पञ्चेन मधुमासे तु प्रतिपत्कदिते रवाविति भविष्योत्तरात्स्व दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वैव वत्सरा
दौ वसंतादौ बलिराज्ये तथैव च पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः इति वृद्धवसिष्ठवचनादिति बहवः युक्तं तु दिनद्वये उद
यसंबंधाभावे वत्सरारंभप्रयुक्तकार्यलोपप्रसक्त्या विद्धवचनं पूर्वयुताग्राह्यतामात्रविधायकं दिनद्वये तत्संबंधे तु तत्संपूर्णत्वादेव
पूर्वप्राप्ते कदा कार्ये निमित्ताकोऽनवविरहानूर्वयुतनवविरहाच्च नैतद्वचनात्पूर्वैति ब्रह्म प्रवर्तयामास तदा कालस्य गण
नामपि ग्रहान्नक्षत्रान्मासान्वत्सरान्संवत्सराधिपान् नैतद्वचनात्पूर्वैति) दशौ सभगवान्ब्रह्मा सर्वदेवसमागमे ब्राह्मा

ब्रं
ता
८
17

सन्ध्याभार्यां ब्राह्मणानामतिदेश्य पतत्वं गतः । यथोक्तैस्तैर्नमस्यन्त स्तवैस्तं ब्राह्मणास्तते ततस्तेन कृतन्यास ऋषभास्ते वैविध्यमालयं स्वानि
स्वान्यथ कर्माणि ते नियुक्तास्तच्च क्रिरे ब्राह्मी सन्ध्या कृष्णरूपा विशेषेण तदानवे धारयन्ती मलं रूपमादिदेश मनोहरा ततः प्र
भृति यो धर्मः पूर्वैः पूर्वतरैः कृतः । अद्यापि गृह्यते तत्तं च वर्णैर्मासेऽप्य यत्नतः । तत्र कार्या महाशान्तिः सर्वकल्मषनाशिनी सर्वोत्पा
तप्रशमनी कलिदुःस्वप्ननाशिनी आयुःप्रदा पुष्टिकरी धनसौभाग्यवर्धिनी मंगल्या च पवित्रा च लोकद्वयसुखावहा तस्मा
मादैव संपूज्यो ब्रह्मा कमलसम्भवः पाद्यार्घ्यपुष्पधूपैश्च वस्त्रालंकारभोजनैः होमैर्बल्युपहारैश्च तर्पणैर्ब्राह्मणार्चनैः
ततः क्रमेण देवेभ्यः पूजा कार्या पृथक्पृथक् कृत्वाकारनन्तकारौ कुशोदकतिलान्वितैः पुष्पधूपप्रदीपाद्यैर्भोजनैश्च यथाक्र
मं मंत्रसंपूजनार्थं च बहुरूपपरस्पेशात् मंत्रमिति विज्ञातो विकल्पवचनं बहुरूपं मंत्रं नानारूपास्तु मंत्रान्परिगृह्णीयादिनर्षयः
तेन त्रैन नमो ब्राह्मणा इत्यादि विलेखेय परमात्मनेन नमस्त्यवमंत्रवाका हृदोणज्ञा देवता प्रोक्ता स्वस्त्यपीतः प्रणवाद्यो नमोतं म
न्त्रेणैन न्यस्त्राः ॐ नमो ब्रह्मणे च भ्यं कामाय च महात्मने नमस्ते स्तनिमेषाय त्रुट्ये च नमोस्तु ते लवाय च नमस्तुभ्यं नमस्ते स्तु
क्षणाय च नमो नमः काष्ठायै कालायै ते नमो नमः नाडिकायै च हृस्वायै मुहूर्ताय नमो नमः नमो निशाभ्यः पुण्याभ्यो दिवसे
भ्यश्च नित्यशः पक्षाभ्यां चाथ मासेभ्यः ऋतुभ्यः षड्भिरेव च अयनाभ्यां च पश्चेभ्यो वत्सरेभ्यश्च सर्वदा नमस्कृत्य युगादिभ्यो
गृहेभ्यश्च नमो नमः ग्रहान्विशन्नि नक्षत्रेभ्यो [illegible] ेन नमो नमः राशिभ्यः करणेभ्यश्च व्यतीपातेभ्य एव च प्रतिपत्तिथि

येभ्यस्तु वितानेभ्यः[illegible]ति सदा नमोऽस्तु कुलनागेभ्यः श्वपाकेभ्य एव च सानुपाकेभ्यः सानुचरेभ्यः नमस्तु चतुर्दशेभ्यस्तु म
नुभ्योऽस्तु नमो नमः नमः पुरंदरेभ्यस्तु नतस्ताभ्यो भ्यो नमो नमः पंचाशतेन मो नित्यं दत्तकन्याभिरेव च नमो दैत्यैस्तु भद्रायैत
पायै चाथ सर्वदा भृशाम्बापनमनभ्यं सर्वोस्तु जनकाय च नमस्ते बहुपुत्राय पत्नीभिः सहिताय च नमो वध्यैन पावुध्यै
निद्रायै धनदाय च नलकूबरभ्यस्ताय गुह्यकस्वामिने नमः नमोऽस्तु शंखपद्माभ्यां निधिभ्यां मण्यसर्वदा भद्रकाल्यै नमो
नित्यं सुरभ्यै च नमो नमः वेदवेदांगवेदांतविद्याशेखेभ्य एव च नागपद्मसवर्णेभ्यो नमोऽस्तु गरुडाय च समभ्यस्तु समु
द्रेभ्यः सागरेभ्यस्तु सर्वदा उत्तरेभ्यः कुरुभ्यस्तु नमो हैरण्यताय च भद्राश्वकेतुमालाभ्यां नमः सर्वत्र सर्वदा इलावृता
य च नमो हरिवर्षाय चैव हि नमः किंपुरुषेभ्यस्तु भारताय नमो नमः नमो भारतभेदेभ्यो नवभ्यस्तु अथ सर्वदा पातालेभ्य
स्तु सप्तभ्यो नरकेभ्यो नमो नमः कालाग्निरुद्रशेषाभ्यां हरये क्रोडरूपिणे सप्तभ्यस्तु अथ लोकेभ्यो महाभूतेभ्य एव च
मनसे बुद्धये चैव नमः प्रकृतये तथा पुरुषायाभिमानाय नमोऽस्त्वव्यक्तमूर्तये हिमवत्प्रमुखेभ्यस्तु पर्वतेभ्यो नमोऽस्त्व
पौराणेभ्यस्तु गंगाभ्यः सप्तभ्यस्तु नमो नमः नमस्त्वादिमुनिभ्यस्तु सप्तभ्यस्त्वाथ सर्वदा नमोऽस्तु पुष्करादिभ्यस्तीर्थेभ्य
स्तु नमो नमः सुरभ्यैरावणाभ्यां च नमो भूयो नमो नमः नमस्तेचोच्चैःश्रवसे ध्रुवाय च नमो नमः नमोऽस्तु धन्वंतरये
पुस्तकाभ्यां नमः सदा विनायककुमाराभ्यां विघ्नेशेभ्यस्तु नमः सदा शाखाय च विशाखाय नैगमेषाय चैव नमः नम

ग्र॰ स्कंदस्य हेभ्यश्च स्कंदमातृभ्य एव च ज्वराय रोगपतये भस्मप्रहरणाय च ऋषिभ्यो वालखिल्येभ्यो वैश्रवणाय नमः सदा अग
ता॰ स्तये नारदाय व्यासादिभ्यो नमो नमः अस्रेभ्यः सोमपेभ्यो देवेभ्यश्च नमो नमः असोमपेभ्यश्च नमस्तुषितेभ्यो नमः सदा
१८ आदित्येभ्यो नमो नित्यं द्वादशाभ्यश्च सर्वदा एकादशभ्यो रुद्रेभ्यस्तपस्विभ्यो नमो नमः नमो नासत्यदस्राभ्यां मरुद्भ्यो नि
18 त्यमेव हि साध्येभ्यो द्वादशाभ्यश्च पुराणेभ्यो नमः सदा एकोनपंचाशते च मरुद्भ्यश्च नमो नमः शिल्पाचार्याय देवाय नम
स्ते विश्वकर्मणे अष्टभ्यो लोकपालेभ्यः सानुगेभ्यश्च सर्वदा आयुधेभ्यो वाहनेभ्यो वर्मभ्यश्च नमो नमः आसनेभ्यो दुंदु
भीभ्यो देवेभ्यश्च नमः सदा दैत्यराक्षसगंधर्वपिशाचेभ्य एव सर्वदा पितृभ्यः समदेवेभ्य एतेभ्यश्च नमो नमः सप्तसप्तेभ्य
श्च देवेभ्यो भावगामिभ्य एव च नमस्ते बहुरूपाय विश्वरूपाय विश्वे परमात्मने अथ किं बहुनोक्तेन मंत्रेणानेन वाञ्छयेत् प्राज्ञो
दत्त्वा वा निग्रहं स्थानं दृष्टिं पूर्ववत् अथवा किमत्र विस्तरेण ब्राह्मणानेन देवतोद्देशेन भजयेदिष्टपर्वणः एवं वस्तु मंत्रोक्तक्रमेण
अर्चयेत् पुष्पैश्च धूपैश्च वस्त्रैर्माल्यैः सह शुष्कं संशुष्कं कांस्यमांसं चंद्रशोमासत्त्राव येदिष्टपर्वणः धनधान्यानुविभवैर्द्विजाभि
श्च सर्वशः इतिहासपुराणानां प्रवक्तारं द्विजोत्तमान् कालान्तानवेददेवज्ञान्ध्यायासंवंधिवाधवान् अनेनैव तु मंत्रेण स्वा
हान्तेन तु पृथक् पृथक् पविष्टायाग्रये होमः कर्तव्यः सर्वेन्द्रये वेदविच्चतु षीदत्वा स्थानेषाधानिकेतनि पविष्टाय वस्त्रेष्टा १८
पवेदविद्देवोक्तविधिश्च सदनरत्ने तु वेदवतस्तोऽधिमावेदोक्तविधिनेनिष्यात्मानं चतुर्थीभ्राज्यभागेप्राधानिकेस्या

नेप्रधानहोमारंभमः गमारंभेन ततः कुर्यान्मंगलालंभनैनरः मदनरत्ने शालाशोभाननः कार्या मंगलालंभनं ततः कृतिना
दः भोजयित्वाद्विजान्सर्वान्संपूतनसंबंधिबांधवान् विशेषेणाचभोक्तव्यं कार्योत्रापिमहोत्सवः नवसंवत्सरारंभः सर्वसि
द्धिप्रवर्तकः इतिसंवत्सरारंभविधिः अथात्रैवविसुधर्मोक्तमारोग्यप्रतिपद्व्रतं पुष्कर उवाच संवत्सरावसानेतुपंचद
श्यामुपोषितः प्रातः प्रतिपदिस्नानः कुर्याद्व्रतमनन्यधीः पूजयेद्भास्करं देवं वर्णकैः कमलेकृते वर्णकैः रक्तश्वेतनील
पीतादिभिः शाक्रेनगंधमाल्येनचंदनेनसितेनच तथाकुंकुमधूपेनघृतदीपेनभार्गव कुंकुमः सल्लकीनिर्यासः धूपैः
सितकेर्दधापरमान्नेनभक्षिणा सितकैः शार्करविकारैः ओदनेनचस्वस्तिकेनसतांलवणसर्पिषा सक्तावुन्नमेनचलीवेण
फलैः शाकैः वह्निब्राह्मणतर्पणैः पूजयित्वाजगद्धातारं दिनभागेचतुर्थके आहारंप्रथमंकुर्यात्सघृतंमतवजोत्नम स
र्वेवमनंतमपेक्ष्यघृतहीनंविवर्जयेत् भक्ष्यावसन्तु देवान्नमाहारंव्रतमाचरेत् पानीयपानंकुर्वेतिब्राह्मणानुमतेपुनः
प्रथमाहारंप्रथमग्रासंसर्वंप्रथमंप्रथमंवाहारं एकमेवग्रासमश्नयित्वाऽवशिष्टमन्नंत्यजेत् ब्राह्मणानुमत्यापुन
राहारमेवशिष्टान्नभोजनंपुनः पानीयपानंचकुर्याद्दिनपर्यं ब्राह्मणानुमत्याभुंजानोपिघृतहीनंनभुंजीत घृतहीनं
विवर्जयेदितिनिषेधात् संवत्सरमिदंकृत्वाततः स्नात्वाचयोदद्यात् पूजनंदेवदेवस्यतस्मिन्नहनिभार्गव संवत्सरंस
वत्सरश्शक्रप्रतिपन्नः त्रयोदशामितिलिंगदर्शनात् सवत्संसहिरण्यंचननादद्याद्द्विजातये पूजनंपूजोपकरणं

व्र॰ ना॰ १९

प्रतिमादिव्रतेनानेन धर्मतत्त्वगेगमेवं यथोक्तहति आरोग्यमाप्नोति गतिं न याग्मोयशस्तल्ल्यारग्नं विपुलांश्च भोगान् व्रतेन नस्य

कुरुषोधनारीत्वपूजयेयत्तज्जगत्प्रधानं जगन्मुधानं स्मर्यं इत्यारोग्यप्रतिपद्व्रतं अस्यानेवोक्तं विद्याव्रतं मदनरत्ने विष्णुध

र्मे मार्कंडेय उवाच अष्टपत्रं तु कमलं विन्यसेत्पूर्णकैः शुभैः ब्राह्मणं कर्णिकायां तु न्यस्य संपूजयेद्विभुं ऋग्वेदं पूर्वपत्रे तु य

जुर्वेदं दक्षिणे पश्चिमे सामवेदं तु उदक् चाथर्ववेदं तथा आग्नेये च तथांगानि धर्मशास्त्राणि नैऋते पुराणं चैव वायव्ये पूर्व

मीमांसा पविरं शर्वविन्यस्य धर्मज्ञः सोपवासं तु संपूजयेत् चैत्रशुक्लं समारभ्य सोपवासो जितेंद्रियः मासि मासि प्रतिपदं प्राप्य

शुक्लपक्षस्य यादव संवत्सरं महाराज शुक्लगंधानुलेपनैः भूरिणा परमान्नेन धूपदीपैरतंद्रितः संवत्सरांते गां दद्याद्व्रती

चीर्णव्रतो नरः इदं व्रतं यस्तु करोति राजन्स वेदविद्यांगविधर्मनिष्ठः कृत्वा सदा द्वादश वत्सराणि विरिंचिलोकं पुरुषः

ठनाथाय बाहू सर्वास्त्रधारिणे मुखं च वाचस्पतये चक्षुषी कपिलाय च ललाटं केशवायेति शिरः सर्वात्म-
ने तथा नमः पादौ पूजयामीत्येवमादि प्रपूजयेत एवं पूजां विधायैव रात्रौ जागरणं चरेत गीतवादित्र- १८३

स्यादिक्षणाग्रवर्णानि तं प्रतिमांच प्रकुर्वीत पूजां गंधादिना हरेः नानाफलानि भक्ष्याणि चोपवासान्निवेद्ये
त् ततः प्रभातसमये स्नात्वाचार्यादिभिः सह प्रवर्तेत पूजयेत्साम्बवज्जुहुयात्पश्चिमेन ततः कुंडे वा स्थंडिले कुर्याद
ग्निध्यायनपूर्वकं आज्यभागांतमाचार्यस्सह लोकविधानतः ततोष्टशतसमिद्भिस्तु तदलाभे स्वाभिरेव च द
दधिमध्वाज्यजुह्वाभिस्तिलैर्वेणायमेतच्च आज्येन च प्रतिद्रव्यमष्टोत्तरसहस्रकं अष्टोत्तरशतं चाष्टाविंशतिर्जु
हुयात्क्रमात् अग्नेनोदेवीति मंत्रेणाग्नीणां वै नाममंत्रतः प्रणवादिचतुर्थ्यंतं नमोन्तानेतनामतः नाममंत्रैः प्रज
हुयाद्द्वादशभिरायतान् ॐ अग्नेनेतायनमः स्वाहा ॐ कपिलाय स्वाहा ॐ शेषाय स्वाहा ॐ कालात्मने स्वा
हा ॐ अहोरात्राय स्वाहा ॐ मासाय स्वाहा ॐ अर्द्धमासाय स्वाहा ॐ षट्ऋतुभ्यः स्वाहा ॐ संवत्सराय स्वाहा ॐ
परिवत्सराय स्वाहा ॐ उद्वत्से स्वाहा ॐ कलायै स्वाहा ॐ काष्ठायै स्वाहा ॐ मुहूर्ताय स्वाहा समिदादिभिरेव च
प्रत्येकं जुहुयात्क्रमात् ततः स्विष्टकृदादीन् पूर्णपात्रांतमाचरेत् जपेदष्टसहस्रं तेन स्नानानंतरं तेगुरोत्तमं पू
र्णांहुतिं च जुहुयाद्धोमांते विश्वमित्रचा होमशेषं समाप्याथ कृत्वाग्न्युत्थमपुन पूजयित्वा हरिं देवमा
चार्यं पूजयेत्ततः वस्त्रालंकारभूषाद्यैस्ततो धेनुं समर्चयेत्ततः वस्त्रालंकारभूषाद्यैस्ततो धेनुं समर्चयेत् गावा
मंत्रोस्ति गावो मे अग्रतः सन्तु गावो मे संतु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहं मंत्रमेवं सह

व्र॰
ता॰ कौ॰
१८४

वार्यवस्त्रालंकारणादिभिः ततस्तां पूजयित्वा यतेभ्यो दद्यात्सुदक्षिणां चतुर्दशीं वंशभाण्डपक्वान्नपरिपूरितान् वंशो
पवीतं दद्याद्ब्राह्मणेभ्यः ततः प्रीयतामिति आचार्यादीन्पूजयित्वा शक्त्या वाचयेत्ततः आशिषस्तांविसृज्यापि स्वकीयादाशि
षितः भक्तिश्रद्धोत समस्कृत्य ब्राह्मणांस्तान्विसर्जयेत् ततो हृष्टो वंधुयुतो भुंजीत ह समाहितः एवं कृतेनेन तु फ-
लप्राप्ताततो भवेद्ध्रुवम् ॥ इति श्रीभविष्यपुराणेऽनंतव्रतोद्यापनं अथ भाद्रे शुक्लचतुर्दश्यां कदलीव्रतं हे
माद्रौ भविष्ये यत्त्वया कथितं समाख्यातं कदलीव्रतमुत्तमं तत्तेहं संप्रवक्ष्यामि लोकानुग्रहकारकं नाकपृष्ठे पुरा
देवैः गंधर्वैः यक्षकिन्नरैः अप्सरोभिरकन्याभिर्नागकन्याभिरर्चितं संसारसारतोऽज्ञात्वा कदलीं चेदतस्त्रियः
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे तथा देयमर्घ्यं विरूढीभिः फलैर्नानाविधैस्तथा विरूढैः सप्तधान्यैश्च दी
पालीरक्तचंदनैः दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैर्धूपदीपकैः जातीफलैः पूगफलैः पूजयेद्गतमत्सरः सिक्तह
रिद्रानवरत्नीभिस्ताभिरेव च मंत्रेणानेनचैवार्घ्यं एवं भूतराधिप चिंतयेत्कदलीं नित्यं कदलैः कामदीप
नैः प्रीतरागमलावाणं देहि देवि नमोस्तु ते तस्मिन्कुले न हि भवेत्काचिन्नारी कुलाटिनी दुर्भगा वंध्या
वैरिणी पापचरिता पिवा तस्मिंश्चारिणी भवेत्सौभाग्यसौख्याढ्या पुत्रपौत्रसमन्विता आयुष्मती जीववत्सा
जीवेद्वर्षशतं सवि इति हेमाद्रौ कदलीव्रतं अथ ऊर्जस्य चार्वांगि कार्तिकां मासां वैशाखां वा कदलीव्रते १८४

नत्रकदलीपूजनं आगच्छकदलीदेविसौभाग्यफलदायिनी रूपं देहि जयं देहि यशो देहि विभो जहि आवा
हनं आगच्छागच्छ वरदे शंकरेण समं हे श्वरि करिष्यमाणां पूजां मे गृहाण त्वं शंकरः कर्तव्यमयधिष्ठानं नाना
मणिगणान्विते अधितिष्ठ महादेवि शिवेन सह पार्वति आसनं पूर्वदन्तादिभिर्युक्तं स्वर्णपात्रे स्थितं शुभे
पाद्यार्थं कल्पितं मया गृहाण परमेश्वरि पाद्यं अर्घ्यपात्रस्थितं तोयं फलपुष्पसमन्वितं अर्घ्यं गृहाण मे देवि
भक्त्या दत्तं शिवप्रिये अर्घ्यं कर्पूरीपरिवासितं शीतलं विमलं जलं गंगायाः समानीतं गृहाणाचमनीय
कं आचमनीयं गंगादिसर्वतीर्थेभ्यो मया प्रार्थनया हृतं स्नानार्थं मया देवि गृहाण देवेश्वरि स्नानं ॥
यस्यां स्मे विद्युज्जित्क्लेशं त्वादीनां सदा भवेत् तस्याः कर्पयां देवि सेवनार्थं पार्वतीप्रिय सेव्यतमंत्रैः वस्त्रशुभ्रमि
दे दिव्यं ऊर्णमातंतुशोभनं गृहाणाच्छादनं देवि तथाच्छादय मां सदा वस्त्रं आचमनीयं श्रीखंडचंदनं दि
व्यं गंधाढ्यं सुमनोहरं विलेपनं गृहाणेदं कृपाणी शिववल्लभे चंदनं मालतीचंपकादीनि शतपत्रादिकानि
च सुगंधीनि गृहाण त्वं पूजार्थं सुमनांसि नः पुष्पाणि अगरुं गुग्गुलं धूपं दशांगं आज्यिकं कल्पितं म
या गृहाण परमेश्वरि दीपं नानापक्वान्नसंयुक्तं तांबूलं प्रतिगृह्यतां तांबूलं इदं फलं मया देवि स्थापि
तं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि फलं हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः

व्र॰
ता॰कौ॰
१८५

अनेनपुण्यफलदमनःप्रीतिंप्रयच्छमे हिरण्मयेनीराजने त्वमिन्द्राणीप्रियानित्यंपार्वत्याश्चातिवल्लभा।
मतीनांकामदापूज्याकामात्मेपरिदृश्य प्रार्थना आश्रयोदेवपत्नीनांजितानांचश्रियास्वयं सौभाग्यारो
ग्यंमायुश्चदेहिरंभेनमोस्तुते नमस्कारः कदलीकामदायिन्यै मेयायैतेनमोनमः रंभायैधृतिमायैसर्वसौ
ख्यप्रदेनमः यथायथापातेप्रसवोवर्द्धतेकदलीफलं तथामत्तोरथानांमेप्रसवोवर्द्धतांस्वयं कदलीदान।
मंत्रः अथकथा युधिष्ठिरउवाच कृष्णकृष्णमहाबाहोसर्वविद्याविशारद अनाथनाथविश्वात्मन्नदी।
नदेवकिंकरत्वं त्वमस्माकंपरोबंधुस्त्वमस्माकंपरःसखा त्वयाभिरक्षितानित्यंविचरामोत्रनिर्भयाः ॥
किंचित्प्रष्टुमिच्छामिदेवेशकृपांकुरुवदस्वमे यद्व्रतंसर्वधर्मेषुकृतेयस्मिन्महत्फले सौभाग्यारोग्यदंपुण्यं।
धनधान्याभिवृद्धिदं अन्नाच्छादनपुत्रादिवर्द्धनंप्रीतिकेतनं तत्समाचक्ष्वभगवन्लोकानामुपका
रकं श्रीकृष्णउवाच शृणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं यत्कृत्वासर्वदुःखेभ्योनारीमुच्येतसं
कटात् वस्त्रान्नपानविच्छित्तिर्नभवेन्नुकदाचन पुरामासेतिचैकांतेनकिन्नरीप्राणवल्लभा प्रति
पत्याभवेद्दीनासर्वकामासमन्वितेशुभा सौभाग्यमेकरुंदेभवेज्जन्मनि सपत्नीनांश्रियंवीक्ष्यस्पृहामे
जायतेप्रभो इतिप्रियायावचनंश्रुत्वाहंतांसमभ्रकं रंभाव्रतंकुरुष्वावसौभाग्यकामयेशुभे कु

1885

१८५

तेयस्मिन्व्रते देवि परं सौभाग्यमाप्स्यसि इति श्रुत्वा वचो देवि किंकिणी मामभाषत: रंभाव्रतं भवेत्कीदृक्को ।
विधिः किंच पूजनं केन चादौ प्राचीर्णमेतदीकेन प्रकाशितं रुकिंकिणीभाषितं श्रुत्वा पुनरेवाहमब्रुवत् ॥
रंभाव्रतमिदं वत्से शृणु देवि यथोदितं सौवर्णमाष्कं लिप्य सर्वतोभद्रमंडलं लिखित्वा सम्यक्कथा वर्णैर्नीलैः
पीतैः सितासितैः ब्रह्माद्या देवतास्तत्र स्थाप्य विधिवत्प्रपूजयेत् कलशोपरि संस्थाप्य सौवर्णां सौपटले शुभे उमाम
हेश्वरौ तत्र मूलमंत्रेण प्रपूजयेत् श्रेष्ठां वा सलिलांके कुर्यान्नमस्तदलेन्तवै ततः साग्रां सपर्णां किसलयपूजनां स शो
भनां मूलां कदलीं प्राणप्रपूजयेन्मो यथाविधिः अर्घ्योदकमानीय सेचयेत्तां समाहितः यथा वंशे विवृ।
द्धिस्ते शोभाढ्यी मां सदा भवेत् तथा वर्द्धय मां देवि सेवतां सार्चती प्रिये यथा यथा ते प्रसवो वर्द्धती कदली त
व तथा मनोरथान्मे प्रभवे भवतात्स्वयं एवं हि पूज्य विधिवत्क्रिया युक्तेन चेतसा रात्रौ जागरणं कुर्याद्गीतवा
दित्रनिःस्वनैः एवं या कुरुते नारी व्रतानामुत्तमं व्रतं सकामा विविधान्भोगान्सौभाग्यं विंदते ध्रुवं एवं या कु
रुते देवी कदलीव्रतमुत्तमं तस्मात्कुरु विधानेन यथोक्तफलमाप्स्यसि इति श्रुत्वा विधानेन चकार व्रतमु
त्तमं प्रापसकलेकामांमनसायदभीप्सितं अन्यच्च शृणु राजेंद्र व्रतस्य फलमुत्तमं अनेनाश्चर्यकारं वै सो शृणु
ष्वावहितो भवान् श्रुतेयदाहिताय वै कस्मानीतां सभां प्रति दुःशासनेन दुष्टेन द्रौपदी मध्यमस्तु जा प्राक्

व्र·
ना·कि·
१८६

1886

घमाणेवस्त्रेणचिरेणमामसभ्यदा तृणैनत्वगतेराजन्नदौपयात्राणतायवै अहपुण्यमाणोकृष्णायैवत्तेनसम
पदिष्टवान् तदाकर्ण्यमयाकौन्तेयव्रतेस्मिन्राजसत्तम कृकिमाणाचरितंसर्वंयदेतद्व्रतमुत्तमं तस्यपुण्यफले
दत्तेकृष्णायैराजसत्तम तत्कालमेववस्त्राणांसमृद्धिरभवन्मम दुःखमस्तेनतुष्टेनस्मानिविमेयंपत्केषुच प्रा
दुर्भवन्तिवस्त्राणिनानावर्णानिभारत विनोदुःखमसनःपापोविरामोपत्कप्रकाशात् तावत्कृष्णस्तुवस्त्राणि
कदलीगर्भवत्सुप इत्थंव्रतप्रभावोयंगुप्तोपिकथितोमया कार्यस्त्वविधानेनसर्वकामानभविष्यति अथो
यापते युधिष्ठिरउवाच कस्मिन्मासेतिथौकस्मात्कारेद्व्रतमनघं कथंभावेनकिंकार्यंतत्समाचक्ष्व
केशव श्रीकृष्णउवाच कार्त्तिकेमाघमासेवावैशाखेचजनेश्वर तथा पुण्येमासिप्रकुर्वीतपौर्णमास्यांशु
भेदिने तिथिदशंवर्जयेत्स्वभार्यासहसमाहितः यस्मिन्देशेनलभ्येतकदलीराजसत्तम सौवर्णीमपिशु
भांतत्रकृत्वापूजांसमाचरेत् यदिलभ्येतकदलीमारोप्यादौप्रपूजयेत् यावत्तस्याःफलंतावत्सिंचेज्जी
रेणभक्तितः फलेषुपक्वमेषुसाःपश्चाद्विप्रान्समाह्वयेत् प्रभातेविमलेस्नात्वानद्यादौविमलेजले॥
गृहेतवाससीशुक्लेतत्रसंध्यादिकर्मच अर्द्धमात्रंकृत्वातुस्थंडिलेवागणनःशुचिः अग्निंसंस्थाप्य
विधिवत्तत्रहोमंसमाचरेत् घृतमष्टोत्तरंशतंतिलाज्याहुतिभिस्तथा एकाग्रचित्तःसंहृष्टःकृती १८६

वारितिभिः पृथक् ब्रह्मादिभ्यो देवताभ्यो नाममन्त्रैः पृथक् पृथक् आचार्यं च सपत्नीकं वस्त्राद्यैः प्रपूजये
तः धेनुं पयस्विनीं वत्सयुक्तां रत्नैः स्वलंकृतां स्वर्णशृंगीं रौप्यखुरां कांस्यदोहनिकायुतां ताम्रपृष्ठीं रत्नपु
च्छीं च घंटां दामसमन्वितां अभ्यर्च्य वेदविदुषे आचार्याय निवेदयेत् पादुकोपानहौ छत्रमलंकाराननेकशः
यथाशक्ति प्रदेयानि व्रतस्य परिपूर्तये ततो विंशति षोडश वा द्वादश वात्मानुरूपं संयतः वस्त्रालंकारगंधाद्यैः पू
जयित्वा प्रभोजयेत् वायनानि च देयानि वंशपात्रे स्वशक्तितः दद्याद्दक्षिणां सम्यग् यथाविभवसारतः।
अन्येभ्योपि यथाशक्ति दद्यादन्नं सुसंस्कृतं समापयित्वा तां देवीं व्रतस्य परिपूर्णतां वाचयित्वा यथान्याय
मच्छिद्रं तं च भाषयेत् दीनानाथांश्च संतर्प्य स्वयं भुंजीत वाग्यतः एवं यः कुरुते देवि कदलीव्रतमुत्तमे
स भुक्त्वा विविधान्भोगान्सौभाग्यं विंदते ध्रुवं तस्मात्कुरु विधानेन यथोक्तफलमाप्स्यसि एवं नारी नरो
वापि यः कुर्यात् कदलीव्रतं सर्वान्कामानवाप्नोति स्वर्गलोके महीयते इति भविष्योत्तरे कदलीव्रतं अथ पू
र्णिमान्तमासेन कार्तिककृष्णचतुर्दशी नरकचतुर्दशी तस्यां तिलतैलस्नानमुक्तं भविष्ये कार्त्तिके कृष्ण
पक्षे तु चतुर्दश्यां विधूदये तिलतैलेन कर्तव्यं स्नानं नरकभीरुभिरिति आश्विनस्यासिते पक्षे चतुर्दश्यां
विधूदये कर्तव्यं मंगलस्नानं नरैर्निरयभीरुभिरिति कालादर्शे एतन्मासस्य अमान्तमासेन ज्ञेयं अत्र।

व्र·
ता·की·
८८

चंद्रोदयस्य कर्मकालत्वान्न व्यापिनी चतुर्दशी तैलाभ्यंगस्नानादौ ग्राह्या द्विनेद्वये चंद्रोदयव्याप्तौ तु तैलाभ्यंगस्ना-
नेयमतर्पणादिरूपकर्मकालव्याप्तिलाभात् त्रयोदशीयुतायां च चतुर्दश्यां नियामितैव पूर्वेद्युरेतः स्नानात् नरकं
नैव पश्यतीति योऽरुणोदये स्नानं न समाचरेत्तस्य वचनाच्चोदितद्वयेऽप्यभावेऽपि पूर्वैव सा च द्वेधा भवति त्रयोदश्याधिक्यात्क-
रणाच्चंद्रोदयोत्तरं रात्रिशेषे प्रविष्टा चतुर्दशी परदिने क्षयवशाच्चंद्रोदयात्पूर्वमेव समाप्तेत्याद्यः पक्षः सूर्योद-
योत्तरं किंचित्कालव्यापिन्यां त्रयोदश्यां तत्त्वं प्रविष्टा चतुर्दशी चंद्रोदयकालात्पूर्वमेव समाप्येति द्वितीयः तत्राद्ये पूर्वैव दिन-
द्वयेऽप्यस्य कालालाभाद्विशेषेऽपि पूर्वैव दिने चतुर्दश्यां दिनोदयव्यापिन्यां तैलाभ्यंगेन सूर्योदयस्य चास्य कालत्वेन योगो गौणः
कालः सर्वस्य कर्मण इत्यनेन गौणकालत्वेनाभिहितोऽत्राकालव्याप्तिलाभात् अत्र तैलाभ्यंगस्य रात्रिकर्म-
त्वाद्रात्रावेव वर्तमानया त्रयोदश्या चतुर्दशी विद्धा भवतीति द्वितीयेऽपि पूर्वैव त्रयोदशी यदा प्रातः क्षयं याति
चतुर्दशी रात्रिशेषे त्वमावास्या तदाभ्यंगे त्रयोदशीति समयमयूखे चंद्रप्रकाशार्थं नाचारसंवादिवचनात् य-
दिने हेमाद्र्यादिभिर्लिखनाद्यत्रानस्त्वामस्त्वदा तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्दशी प्राप्येति शेषः
प्रातः स्नानं तु यः कुर्याद्यमलोकं न पश्यतीति अरुणोदयादिप्रयुक्तकर्मानुष्ठाननिमित्तं व्यासवचना-
त् प्रातःकालव्यापिनी पूर्वैव अत्र च चंद्रोदयोत्तरं चतुर्दश्याः सत्त्वेऽपि चंद्रोदय एवाभ्यंगस्नानादिकार्यमित्यादौ ८८

त्वमभवेद्यात् क्रामो हि द्विपरेह्नि तावान्ग्राह्यः स पूर्वविद्धः कार्य इह प्रोक्तः कर्माणीमिति वाक्येन त्रयोदश्युपेते चतुर्दशी
क्रामप्रद्वेषेण चंद्रोदये पारिभाषिकचतुर्दशी स्यात् पूर्वविद्धः पूर्वतिथ्यादि शुक्लकर्माणि यत्र पूर्वा वापरा वाप्र
मारां तत्रेषा ग्राह्या तिथिग्राहितेन प्रामान्यात्तेन मुख्यकाले ग्राह्यतिथेरसत्वे विधानादि प्रद्वेषेण शास्त्रता ।
त्तत्र तन्निषेधः सत्वान्मुख्यकालएव कर्मानुष्ठानं कार्यमिति ज्ञापयतेनेन त्वनेनाप्रापणं कर्तव्य
त्वमुच्यते तथा सति जन्माष्टम्यादौ दिनद्वये कर्मकालव्याप्तौ पूर्वविद्धाप्रसक्तेन शास्त्रतन्निषेधः स्यात् एवं
च प्रकृते चतुर्दश्यामुभयं तेषु पूर्वैः क्रमस्कांदेन पूर्वा प्राप्ते ग्राह्यतिथिचतुर्दशीगतत्वात्पूर्वेति चोप्रद्वेषेण त्वा ।
सा द्वयोश्चतुर्दश्यामेव तानि चरणान्यव्याप्त्या एतेन विधेयान्वयि त्वा पूर्वविद्धायादौ कार्या तन्निषेधे वच्च शब्देनेति
देशान्तर पितृभ्यो दद्यादित्यादौ तथैव चतुर्थ्यां तु चतुर्दशी कार्यं चतुर्दश्यामावास्या तन्मुख्यादि प्रद्वेषेण कर्म
कालव्याप्तिनिर्णयः कार्यः तच्छास्त्रं श्रवणं पितृभ्यो दद्यादित्यादौ तथैव चतुर्थ्यां तु तेन दिनद्वये चंद्रोदये चतुर्द
श्यभावे तत्रामावास्याहूतासतेवं चंद्रोदयव्याप्तिना मसायां त्वावं कार्यं इत्याश्रित चतुर्दश्यामिन्द्र त्वयतिथ्याव
पि ऊर्जादौ स्वातिसंयोगेन दीपावली भवेदिति नारदवचनेपि शास्त्रेन चतुर्दशी स्यात्के अमावास्याच कल
नेन विधानस्येह प्राविषयत्वप्रतो चित्यात् इति पराक्तं अत्रमांते मासेनाश्विन कृष्ण चतुर्दश्यमावास्ययोः

व्र०

ता० की०

१८८

ऊर्जासिते दाविण्येतेन कार्तिकशुक्लप्रतिपद्येवं संलग्नतिथित्रये दीपोत्सवस्नानादेः कुर्यात्तैलग्नमेतच्च दीपोत्स
वदिनत्रयं तैले लक्ष्मीर्जले गंगा दीपावलीतिथौ वसेत् अलक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरेत् इतिकार
देनैवाग्रेयमस्वीकृतत्वात् चतुर्दश्यास्त्याने अमायाश्च तु कल्पनविषयमिति यत्किंचिदेतत्तस्माद्दिनद्व
येचंद्रोदये चतुर्दश्यभावे त्रयोदश्यामेवाभ्यंगस्नानादि कुर्यादिति सिद्धं यत्तु कालादर्शे धृतमात्स्ये स्यंगा
कोदयवेलायां त्रयोदश्यां यदा भवेत् दर्शे वाभ्यंगस्नानं नरः स्वर्गकाम यमप्रदमिति त्रयोदश्यादितिद्वयः
योऽरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः तस्याब्दिकभवो धर्मो नश्यत्येव न संशयः इति भविष्ये यः
सन्निहितदास्यायेन चतुर्दशीस्तत्पर्यो ज्ञेयोऽन्यथोक्तोदाहरणे विहितस्नानादेर्लोपापत्तेरितिदिक् पूर्वोक्त
स्नाने विशेषो ब्राह्मे तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्दशी प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यति
अपामार्गमथो तुंबीं प्रपुन्नाटमथापरं भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै अपामार्गस्य पत्राणि भ्रा
मयेच्छिरसोपरि इति अत्र यमलोकदर्शनाभावकामः स्नास्ये इति प्रयोगः प्रपुन्नाटश्चक्रमर्दकः तद्भ्रामणमं
त्र सीतालोष्टसमायुक्त सकंटकदलान्वित हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः कार्यं तु मंत्रेण
तच्च सर्वालाभे त्रिभिरेकं वा कार्यं तदलाभे तुंबीप्रपुन्नाटान्यतरेण वा स्नानानंतरं कृत्यमेतदेव ॥ १८८

ततस्तर्पणंकार्यंधर्मराजस्यनामभिः नाममत्रैश्च यमायधर्मराजायमृत्यवेचांतकायच वैवस्वतायका
लायसर्वभूतक्षयायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैनमः इतितर्पणेवि
शेषः तत्रैव यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाथवा देवत्वंचपितृत्वंचयमस्यास्तिद्विरूपतेति विशेषांतरंस्कां
दे दक्षिणाभिमुखोभूत्वातिलैःसव्यंसमाहितः देवतीर्थेनदेवत्वात्तिलैःप्रीताधिपोभव इदंचजीवत्पितृके
णापिकार्यं जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोः कृष्णैस्तिलैस्तथाभीष्मकुर्यात्तर्पणमित्युचेति पाद्मोक्तेः
अन्यैःशुक्लैःदेवत्वपक्षेशुक्लतिलैः पितृत्वपक्षेकृष्णतिलैरितिव्यवस्था एवंस्नानाद्यव्यवहितमेव प्रातःकाले
यमादीनांतर्पणंप्रदोषेदीपदानंकार्यं तदुक्तंपाद्मे ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान् ब्रह्मविष्णुशिवा
दीनांमठेषुभवनेषुच मंदारामविभक्तासु हस्तिशालासुचैवहीति विशेषांतरंलैंगे ततःप्रेतचतुर्दश्यांभोजयि
त्वातपोधनान् शैवान्विप्रांस्तुपरान्शिवलोकेमहीयते दानंदत्वातुतेभ्यश्च यमलोकंनगच्छति तथा माघप
त्रस्यशाकेनभुक्त्वातत्रदिनेनरः प्रेतचतुर्दशीकालेसर्वपापैःप्रमुच्यते तथानक्तभोजनमप्युक्तंतत्रैव नक्तंप्रे
तचतुर्दश्यांयःकुर्यात्सुव्रतश्चये तत्रतत्कृतदानेनापिप्राप्यतेपुण्यमीदृशमिति अथकार्तिकशुक्लचतुर्दश्यां
वैकुंठचतुर्दशीव्रतं तदुक्तंसनत्कुमारसंहितायां वर्षेवैहेमलंबाख्येमासिश्रीमतिकार्तिके शुक्लपक्षेचतु

ब्र० दृश्यमकल्याणमभ्युदयं प्रति महादेवदिने यो वा लोकेषु हर्षे मणिकर्णिके स्नात्वा विश्वेश्वरो देवो विश्वेश्वरम्पूजये
ना० कौ० त् संवत्सरे पंजे ज्योतिर्लिंगस्य प्रतिष्ठास्थानमकारोत स्वयमेव स्वयम्भावात् चरतो श्रयत्नि तिष्ठन्ते ततः प्रभाते विमले कृत्वा स्व
१८९ जं महाद्भुतं देवदारोर्महानाम्नि वने स्मिन् कृतपारणा श्रीमज्ज्वालानीलदेवप्रविशुपेद ममनन्तसमिति सनत्कु
मारसंहितोक्तेः अत्रपरत्र्कान्तिसद्रूपेणानेनेनार्थवादेन स्नात्वा विश्वेश्वरः पूज्यः इति विधिः कल्प्यते ततश्चप्रा
तिस्विकपारणविषये सर्वदिनेऽप्युपवासः सचतुर्दशीयुक्तारुणोदयव्यापिहोरात्रे कार्य इति तात्तचरणाः शि
वरहस्ये श्रावणकार्त्तिकेमासि चतुर्दश्यां ह्युपोषिते सायंकाले समाराध्य पूजां कृत्वा स्थितामहेदेवगृहका ततः
परेऽहनि विप्रगणाः सर्वेऽपि सदतुभक्षात् सहस्रमितिशिवयत्नेन समक्ष्यां भ्रमणादिभिः ततोऽरुणोदये जाते स्नात्वा स्ना
त्वा च भस्मना त्रिपुण्ड्रधारणं कृत्वा कृत्वा रुद्राक्षधारणं संध्यां संप्राप्य विश्वेशं समभ्यर्च्य को भवति एवं सलिंग
सर्वदा० पूजनं शुभं सर्वकामदं ऊर्जे शुक्लचतुर्दश्यामर्चितं बहुपुण्यदमिति पूर्वं तु शुक्लपक्षे पुण्ये स्मिन् कार्त्तिके मासि
सोमवारे शुभं शंकरं उपोष्याभ्यर्च्य येऽस्मिन्यातिशियामचतुष्टये ऊर्जे शुक्लचतुर्दश्यां काश्यां विश्वेश्वरं प्रभुं
समर्च्य पितृमिन्द्रायोगं प्राप्नोति सम्भाभिसदाराम् इत्यादि इति वैकुण्ठचतुर्दशी शिवरात्रिवत् तत्र सोऽश्वमेधफ
लं लभेत् तत्रैव तेन संयः कुर्यादित्यध्याहार्यं ईशानसंहितायामपि माघकृष्णचतुर्दश्यामादिदेवो म। १८९

ह्यनिशि शिवलिङ्गमभूत्तच्चकोटिसूर्यसमप्रभं तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः माघकृष्ण
त्वंचाद्वमासमपास्येन स्नातपश्च चतुर्दश्यां तु कृष्णायां फाल्गुने शिवपूजने तामुपोष्य प्रयत्नेन विषयान्परि
वर्जयेत् सुमंतवचने शिरीर्मांतमासोपक्षः महानिशा च महानिशा द्विघटिका रात्रेर्मध्यमयामयो इति दे
वलोक्ते निशीथस्यैव पर्वकार्जराजशाह्योपितन्मायैव दिनद्वये निशीथव्याप्ताव व्याप्तौ वापरैव प्रदोषव्याप्तिला
भात् दिनद्वये चतुर्दश्यां पूर्वान्याप्याग्राह्या आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी तद्रात्रिः शिवरात्रिः
स्यात्सा भवेदुत्तमोत्तमेति त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी ।
प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् अहोरात्रे व्रतं यच्च एकमेकाति
थौगते तस्मात्सभयुयोगिन्या माघोनेत्रं व्रतं भवतीति कामिकशिवरहस्यस्कंदपुराणादिवचनाच्च पूर्वेद्युर्निशीथे
परदिने प्रदोषे न दा पूर्वैव अर्द्धरात्रात्पुरस्तात्तु जयायोगो यदा भवेत् पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति
पाद्मे जयायोगस्य विहितत्वात् महतामपि पापानां दृष्टा वै निष्कृतिः शुभा न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तथा
शिवामिति स्कान्दे दर्शयोगस्य निन्दितत्वाच्च यत्तु कालतत्त्वविवेचनेन परेद्युर्दिनद्वये निशीथव्याप्तावेव पूर्व
विद्धाविधायकान्युक्तविद्धानिषेधकानि वचनानि सावकाशानीत्युक्तं पूर्वैव ग्राह्येत्युक्तं तन्न समञ्जसं ॥

व्र॰
मा॰ कौ॰
१९०

शिवरात्रिव्रते भक्तां काममविज्ञो विवर्जयेत् कामन्त्रयोदशी निशाह्वये चतुर्दश्यांशकैर्न्यायाज्ज्यां पराशुभेति माध
वाचार्यदाक्षिणात्यकामिकवचने काममविज्ञातिथियात् न च सर्वविज्ञाकानामवरविद्वानिषेधात् कान्तां विधृयालाभ
इति चेन्न प्रदोषनिशीथयोग्यालाभतयाउपोद्बलकत्वेन विषयलाभस्यान्तयोदमेवोक्तत्वात् प्रदोषव्याप्तिलाभाद्ध
माघासितेभूतदिने हि राजन् येनियोगे यदि चेच्चतुर्दश्यां जयाप्रयुक्तां न तु कुर्यात् शिवस्य रात्रिं प्रियकृच्छिवस्ये ।
ति हेमाद्रिमाधवाचार्यादा एतद्वाणवचनादपि परैव अस्मिंश्च व्रते उपवासजागरणपूजानां फलमेवेथा
ने स्वचनाग्रतः उपवासप्रभावेन बलादपि च जागरात् शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया अ
क्षयान् लभते भोगान् शिवसायुज्यमाप्नुयादिति इदं च व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च पराशरवचने
नास्ति शिवरात्रिपरात्परं न पूजयन्ति भक्त्येह रुद्रं त्रिभुवनेश्वरं जन्तुर्जन्मसहस्रेषु भ्रमन्ते नात्र संशयः इति
स्कान्दे च कारणेषु वासयेति तिथिं शिवं च पूजयित्वा यो जागर्ति चतुर्दशी मातुः पयोधारारसं न पिबेत् स क
दाचिदिति गादितेश्चेत्फलश्रुतेः साम्यमिति विरमस्तन्नान्तचर्यणकृत न समयमशुचिद्रष्टव्यः पारणं ।
चैतद्व्रते स्कान्दे तिथिमध्ये तदन्ते चोक्तं उपोषणं चतुर्दश्यां तु पारणं कृतैः स्वकृतलक्षैरप्यलभ्यते यदि वा
कालोऽडोदाम मध्येत्वयानिनीयतिमतिवे संस्थितानिभवेतीहसत्वायां पारणे कृते तिथ्यन्ते पारणं

१०

यो हिताशिवचतुर्दशी । तथा कृष्णाष्टमी स्कंदशिवरात्रिश्चतुर्थ्यैव च । एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेदि । अनयो
र्विरुद्धवचनयोर्व्यवस्थैव माधवेनोक्ता यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणेति वचनात् यामत्रयमध्ये चतुर्दशीसमाप्तौ ति
थ्यंते तदूर्ध्वगामित्वे तु प्रातस्तिथिमध्य एवेति कश्चुः न च कृतैः स्वकृतलक्षैः श्रेत्यादिस्मृतिरनर्थिकेति वाच्यं आपः
स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः । अतः संतः प्रशंसंति स्नानमुष्णेन वारिणेत्यादिवद्दशक्रमस्येवेति तिथिमध्य
पारणाया स्तावकत्वेन सार्थकत्वादिति । परे तु तिथ्यंते पारणाविधानेन शिवरात्रिपारं किं तु यत्राष्टम्यादौ तिथ्यंते पारणा
प्राप्तिरस्ति तत्परमेव शिवरात्रिग्रहणं तु पूर्वविद्धाविधानार्थमिति वदंति तन्न समानन्यायपर्यंतव्यापिनी चेत्परेहनि
दिवैव पारणं कुर्यात् पारणे नैव दोषभागिति शिवरात्रिप्रकरणपठित कालादर्शादिलिखितवचनात् दिवा तिथिस
माप्तौ तिथ्यंते इति निर्णयः । अथ व्रतविधिः मासपक्षाद्युल्लिख्य मम पापक्षयार्थं अनंतयमोक्षप्राप्त्यर्थं शिवरात्रि
व्रतं करिष्ये इति संकल्प्य षोडशोपचारैः शिवपूजां कुर्यात् । तत्पूजा आगच्छ देवदेवेश मर्त्यलोकहितेच्छया । पूजया
मि विधानेन प्रसन्नः सुमुखो भव । आवाहनं । पाद्मासनं कुरु प्रीत्या निर्मलं स्वर्णनिर्मितं । भूषितं विविधै रत्नैः कुरुष्व
पाद्मासनं । आसनं । गंगादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं । तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यतां । पाद्यं । गं
धोदकेन पुष्पेण चंदनेन सुगंधिना । अर्घ्यं गृहाण देवेश भक्तिं मे ह्यचलां कुरु । अर्घ्यं । मंदाकिन्याः समानीतं हेमा

व्र. ता. कि. १९१

191

वोरुहवासितं स्नानायतेमयाभक्त्यानीतंसलीलंक्रियतांविभो: स्नानं वस्त्रंसूक्ष्मंदुकूलंचदेवानामपिदुर्लभं गृ
हाणत्वंमयादत्तंप्रसन्नोभवसर्वदा वस्त्रं श्रीखंडचंदनंदिव्यंमलयाचलसंभवं विलेपनंसुरश्रेष्ठगृहाणपर
मेश्वर चंदनं यज्ञोपवीतंसहजंब्रह्मणानिर्मितंपुरा आयुष्यमवर्चस्यमुपवीतंगृहाणमे यज्ञोपवीतं माल्या
दीनिपुष्पं वनस्पतिरसोद्भूतोगंधाढ्यःसुमनोहरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां धूपं आज्यंत्रिवर्तिसं
युक्तंवह्निनायोजितंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह दीपं नैवेद्यंगृह्यतांदेव०० पूगीफलंमहद्दि
व्यंनागवल्लीदलैर्युतं एलादिसमायुक्तंताम्बूलंप्रतिगृह्यतां ताम्बूलं इदंफलंमया०० हिरण्यगर्भगर्भस्थंहे
मबीजंविभावसो अनन्तपुण्यफलदमतःशान्तिंप्रयच्छमे पुष्पाञ्जलिः नीराजनं प्रदक्षिणा श्रूयतांधर्मसर्वस्वं
शिवरात्रौशिवार्चनं व्रतयज्ञविधानेनस्वर्गप्रापणेनकर्मणा कृत्वास्नानंशुचिर्भूत्वायोनवस्त्रसमन्वितः स्था
पयेद्देवदेवेशंमंत्रैर्वेदसमुद्भवैः ततःपूजाप्रकर्तव्यापूर्वोक्तविधिनाततः नमोयज्ञजराताताय नमस्त्रिभुवने
श्वर पूजांगृहाणमहत्तांमहेशप्रणमेपदे प्रथमप्रहरपूजा पूर्वेनंदीमहाकालोगणाभृंगीचदक्षिणे हृ
षस्कंदौपश्चिमेचदेष्णुकालोत्तथोत्तरे गंगाचयमुनाचैवपार्श्वेचैवव्यवस्थिते नमोव्यक्तायसूक्ष्मायनम
स्तेत्रिपुरान्तक पूजांगृहाणदेवेशयथाशक्त्योपपादितां वधोहंविविधैःपाशैःसंसारभयबंधनैः पतितं १९१

मोहजाले मां तेषु मग्नं हर शंकर नमः शिवाय शान्ताय सर्वपापहराय च शिवरात्रौ मया दत्तं गृहाणार्घ्यं प्र
सीद मे द्वितीये दुःखदारिद्र्यभावैश्च दग्धोहं पार्वतीपते मां त्वं त्राहि महादेव गृहाणार्घ्यं नमोस्तु ते तृतीये
किं न जानासि देवेश तावद्भक्तिं प्रयच्छ मे स्वपादाग्रतले देव दास्यं देहि जगत्पते चतुर्थे कुर्वन्ति ये व्रतं कोपि शिव
स्य पूजां हमन्त्रपातु यथा कथंचित् सकृत्प्रयात्येव शिवस्य लोकं व्याधोपि यातो यदि शंभुरक्षात् इति पूजा अर्घ्यक
ध्या ईश्वर उवाच सकाराणामशेषस्य शशांककृतशेखर कपालधारिणं भीमं वरदं ह्यभयप्रदे पंचवक्त्रे दशभुजे
जगतः सर्वदा शिवं गोब्राह्मणरूपाणां च शिवं भवतु सर्वदा कैलासशिखरासीने देवजन्मा ... पंचवक्त्रे दशभुजे देवे
त्रिनेत्रे शूलपाणिनं पिनाकशोभितकरं खट्वांगकधारिणं कपालखट्वांगधरं नीलकंठसुशोभिते भस्मांगा
गव्यालशोभिता च मस्थिमालाविभूषिते नीलजीमूतसंकाशे सूर्यकोटिसमप्रभे क्रीडन्ते च शिवं तत्र गणैश्च
परिवारिते विरूपदेवताः सर्वा लिष्टं तं परमेश्वरं तं दृष्ट्वा देवदेवेशं प्रहसन्नोत्फुल्ललोचने पार्वती परिपप्रच्छ वि
नयावनता स्थिता गौरी प्रोवाच भर्तारं विस्मयोत्फुल्ललोचना पार्वत्युवाच केनोपायेन प्रसादेन यत्त्वं ... त्वं मह
मे श्रुतास्त्वत्प्रसादाद्देव शास्त्राणि निर्णयाश्च प्रभाः तथा वैतानधर्माश्च स्मृतीनां धर्मास्त्वयोदिताः नास्ति केन निश्चयं दे धा
व भ्रान्ताहं च पुनः पुनः तस्मादहं त्वम देव पकेतिः शाश्वतप्रभाः व्रतानामुत्तमं देव भुक्तिमुक्तिप्रदायक तद

व्र.
ता.कै.
१८२

हेश्रोतुमिच्छामिकथयस्वममप्रभो ईश्वरउवाच शृणुदेविप्रवक्ष्यामिव्रतानामुत्तमंव्रतं यन्नकस्यचिदा
ख्यातंवरहस्यंसम्पत्करंदायकं येनैववकथ्यमानेनयमोविलयंतांव्रजेत् तदहंकीर्तयिष्यामिशृणुष्व
कमनाःप्रिये माघान्तेकृष्णपक्षेतुविहायाचतुर्दशी शिवरात्रिस्तुसाज्ञेयासर्वयज्ञोत्तमोत्तमा
दानैर्यज्ञैस्तपोभिश्चव्रतैश्चविविधैरपि नतीर्थैस्तद्भवेत्पुण्यंयत्पुण्यंशिवरात्रिजैः शिवरात्रिसमंनास्ति
व्रतानामुत्तमंव्रतं अज्ञानाज्ज्ञानतोवापिकृत्वामोक्षमवाप्नुयात् स्नात्वातेनिरयंप्राप्यगन्तालेशिवस
न्निधौ सर्वमंगलशीलाचसर्वामंगलनाशिनी भुक्तिमुक्तिप्रदाचैकामत्यमसत्यवरानने देव्युवाच क
थंयमस्यंमार्गस्थान्मुक्तादेवाव्रजेन्नरः एतन्मेमहदाश्चर्यंप्रयत्नेनकथंशंकर शंकरउवाच शृणुदेविय
थावृत्तांकथांपौराणिकींशुभां यमशासननाशीचशिवशासनदायिका कश्चिदासीत्पुराधर्मवि
निषादस्त्वामिषप्रियः प्रत्यन्तदेशवासीचपृथुधामस्वनेकतनः सोमान्तेसमदातिष्ठत् ऊर्ध्वपरिपा
लकः तत्रापीनोपरन्ध्रीरीषणामागः कृष्णकञ्चुकः वद्धगोधांगुलित्राणः सदेवमृगयापरः एवंविधो
निषादोसौचतुर्दश्यांदिनेशुभे गवहार्थकेशाद्यद्यदेवागारेप्रहेषितः तेनापिदेवताप्रेक्षाजनानांचवचने
श्रुते उपवासव्रतानांचशिवःशिवेशिवेतिच दिनान्तेनसदाव्यक्तःप्रानर्द्धिंप्रदीयते ततोसौपथराधा। १८२

यदृच्छयेन गतः स्वयं आगच्छत्स वनोद्देशे जनहासं च कारसः शिवः शिव किमेतद्धै कुर्वंति नगे जनाः
वनेचरान्निरीक्ष्य सच्चतुर्दिक्षुरितस्ततः पदे च पदमार्गे चाश्रमेष्टु करान्मृगान् दृष्टेनस्तु यावत्स आमि
षेलब्धमानसः वने सर्पवितं संवभ्रमतस्तस्य दिने गते संध्यायां तेन नैनाकिंचिन्मृगमस्तु करपालिमाः तिराशेणा।
लब्धकोजानन्सत्रासत्सगतो यविः चिंतयित्वाजलापांते जागरं जीवच्चात्तेन संविधायस्मामहं रात्रौ निश्चि
तेमममजीवने गतो सोजलमामीश्च्छीरस्थोजलमध्यतः आश्रयेकतले मारिभेश्रात्मनोश्मिकारणात् जा।
लिमध्ये महालिंगमस्तिलायभेवेश्रुभे विल्वहुलो महादिव्यो जालमध्ये च संस्थितः गृहीत्वा तन्स्य पत्राणि
मार्गश्रुद्धये मक्षिपत् हिमानि दलानि भागगतानि लिंगमूर्ध्नि इति न दिवा भोजनं तस्य श्रामि षेलब्धमा
नसः ततश्चिंतयमानस्य न निद्रासमजायत तस्य गंधेसमासाद्य लब्धकस्य वराननेन तिष्ठंति मृगाः स-
वैशब्दात्भयान्तदा मृगान्निरीक्षितेन तस्य निद्रानाशो प्रजायत विल्वजानि लिंगतस्तास्य प्रथमः प्रहरोग
तः ततोजलार्थमायाता हरिणी गर्भसंयुता यौवनस्था स्वरूपा च स्तनपीनाम्रशोभना निरीक्षन्ते दिशाः
सर्वाः भयसंस्तुलोचना लब्धकेनापि सा दृष्टा बाणगोचरमागता बाणं श्रसंधितं तेन पकहृष्टेन।
चेतसा त्रोटयित्वाथ पत्राणि प्रक्षिप्तानि शिवोपरि शिवं देवं समुद्दिश्य ध्यायन्शीतेन परिपीडितः एतस्मिन्नं।

ब्र॰ ततोहृष्टोहरिणाल्लुब्धकस्तदा लुब्धकस्तुस्वरूपेणकृतांतस्त्वतिष्ठति दृष्ट्वातत्रस्थितंध्यानंयमदंष्ट्रासम
ता॰ कं॰ प्रभं मामसौदिव्ययावाचालुब्धकंवाक्यमब्रवीत् स्थिरोभवमहाबाणयमर्वजीवनिकृंतन किमर्थंमां
हंतिपाल्लकथयस्वममप्रभो ।। लुब्धकउवाच ।। क्रुद्धंवेपीडितंमेयद्धृदयंयाचमयागमह यत्नैवमन्महे
१८३ नास्तितेनत्वांहन्मिशोभनां ।। मृगउवाच ।। जातःपुत्राप्रभोवैनज्ञायतेपूर्णोपिच चतुर्थोशेनया
यातोविमलोलुब्धकस्तदा लुब्धकस्ततोहृष्ट्वामृगीमानुषभाषिणीं आश्चर्यपरमंदृष्ट्वाकिंचिज्जगौ।
 समन्वितः ।। लुब्धकउवाच ।। मयाहिघातिताजीवाउत्तमाधममध्यमाः नश्रुतावाईदृशीवाणीस्थाव
राणांकथंचन कस्मिन्देशेत्वमुत्पन्ना कस्मात्स्थानादिहागता कथयस्वप्रयत्नेनपरंकौतूहलंहिमे ।।
मृगीरुवाच ।। शृणुत्वंलुब्धकश्रेष्ठकथयामितवाखिलं आसीत्पूर्वंमहारम्यास्वर्गेशक्रस्यचाप्सरा
श्रेष्ठारूपलावण्यसौभाग्येनचगर्विता सौभाग्यमदपूर्णांगीदानवोवलगर्वितः मयैवमस्कृतोभर्ताहि
रण्याक्षोमहाबलः तेनसार्धंमयाभुक्तंचिरकालंयथेप्सितं अन्यस्मिन्दिवसेव्याधक्रीडंत्यामसुरेणच
अप्यहंप्रेक्षितेनित्यंशंकरस्याग्रतस्तदा यावद्रुद्धामुहेतत्रतावत्मांशंकरोब्रवीत् अगतात्वंवरारोहेकेन
वासेगतासुभ्रुभे किंवासौभाग्यगर्वेणनायातामममंदिरं सत्यंकथयशीघ्रंमेनोवाशापंददामिते शाप

भीतेनमयातत्रस्थस्कंधंशंकराग्रतः स्थाप्यदेवप्रवक्ष्यामिशापानुग्रहकारक ममास्तिभगिनीविप्रशेषशादानवेंद्रो
महाबलः तेनसार्धंमयादेवक्रीडितंनिजमंदिरे तेनाहंनागतापीडितुंस्थितिंमहाबकारक रुद्रस्तस्यचनेश्रा
तामकोपेनवाक्यमब्रवीत् यस्मात्कामातुरोमित्येहिराप्तोत्वोभविष्यति तस्यगीतस्यभार्यावैभविष्यतितनेश्चा
यः तस्मात्स्वर्गेतिष्ठादेवानदानवैभोक्तुमिच्छसि द्वादशाहनिमोभद्रेभवताशापपावते यस्मात्स्पर्शोकेनशा
पांतोपिभविष्यति अनुग्रहः पुनस्त्वेषः शंकरेणाकृतास्वयं कदाचिद्विप्राआयवोममसान्निध्यमाश्रितः यथार्थेन
स्पर्शप्राप्यस्वर्गंजन्मस्मरिष्यसि अतऊर्ध्वंतयाकद्रेहस्तोमोक्षमवाप्स्यसि शंकरेणमयादृष्टोवसंत्यासित्महा
वने ततोदुःखमनुप्राप्यामोसुवेदोविवर्जिता गर्भिंकांताविशेषेणनवध्याचेतितिनिश्चितं ततकुटुंबस्यतेन्नंभोजनं
नभविष्यति आयास्यतिस्थगीतस्यामार्गेणतेनलुब्धक पीनायौवनसंपन्नावकुमासामदाक्रांता भोजनेसकुटुं
वस्यतवसयोभविष्यति अथवानोमस्तोवायपानार्थेतुजलाप्सुये आगमिष्यतिप्रत्युषेवपार्थस्यतमंशायः गर्भे
तस्याश्चतपर्णनवलात्वंदिप्यवंपुत्र शापवेतामिष्यामिसंदिप्यच्यमाद्वीजते तस्मात्त्वहचनेश्चात्वावायोविस्म
यमागतः श्रुणुमेकंतथास्थितवायोवचनमब्रवीत् नागमिष्यतिचेदत्रोजीवंतमपिगच्छामि दृष्टपापी
डितोहंवैकुटुंबंचविशेषतः प्रातस्त्वयाममस्ट्हेमागंतव्यंयथायथं शापयेअवृजतंहियस्योमेप्रत्ययोभवेत्

ब्र· पृथिवीवायुरादित्यः सत्ये तिष्ठन्ति देवताः तस्मात्सत्येन ते गन्तं भवत्या स्वगृहं प्रति तस्य तद्वचनं श्रुत्वा गर्भांत्री
ता·कं· सम्प्रत्यतदा चक्रे सत्यप्रतिज्ञां वैशाखस्याग्रे पुनः पुनः ॥ ऋषिरुवाच द्विजो भूत्वा तु यो ह्याद्य वेदमन्त्रो ह्यभिजाय
ते स्वाध्यायसन्ध्याविरहितः सत्यशौचविवर्जितः अविक्रियाणां विक्रीता अग्राह्याणां च याजकः तस्य पापेन लिप्या
२६४ मि यद्यहं तां गमे पुनः कुम्भकुण्डे तु यत्पापं शूद्रे वा ग्रामकूटके नास्तिके च विशीले च परदाररते तथा वेदविक्रिय
णे चैव शावसूतकभोजने तेन पापेन लिप्यामि यद्यहं तां गमे पुनः मातृशय्याप्रतिग्राही मातापित्रोरपाल
की तेन पापेन लिप्यामि यद्यहं तां गमे पुनः दानं दत्वा प्रहृष्टस्य यो न तत्पं करोनरः तेन पापेन लिप्यामि यदि
तां यामि ते गृहे देवद्रव्यं गुरुद्रव्यं ब्रह्मद्रव्यं हरेत यः तेन पापेन लिप्यामि यदि तां यामि ते गृहे दीपं दीपेन
यः कुर्यात्पादं पादेन धावयेत् तेन पापेन लिप्यामि यदि तां यामि ते गृहे भर्तारं स्वामिनं मित्रं आत्मानं वाले
मेव च तेन पापेन लिप्यामि यदि तां यामि ते गृहे गोविप्रं च कृतार्थं यो मारयति दुर्मति तेन पापेन लि
प्यामि यदि तां यामि ते गृहे अवैष्णवे च यत्पापं दाम्भिके जने अजितेन्द्रिये यत्पापं परदोषानुकीर्तने कृत
घ्ने च कदर्ये च परद्रव्यरते तथा सदाचारविहीने च परपीडाप्रदायिके परपैशुन्यशुक्ले च कन्याविक्रयका
रके परापवादमत्तस्य सर्वधर्मविवर्जिते वृषलीपत्यौ वार्धुषिके पित्रोरन्तरदायिके हैतुके बककृतौ च २६४

कूटसाक्षिप्रदे तथा एतेषां पातकं मह्यं यदि नायामि ते गृहे यत्पापं ब्रह्महत्यायां पितृमातृवधे तथा तेन पापे
न लिप्यामि यदि नायामि ते गृहे यत्पापं लुब्धकानां च यत्पापं गरदायिने तेन पापेन लिप्यामि यदि नायामि ते गृहे
द्विभार्यापुरुषो यस्तु समदृष्ट्या न पश्यति तस्य पापेन लिप्यामि यदि नायामि ते गृहे सकृद्दत्त्वा तु यः कन्यां द्विती
याय प्रयच्छति तेन पापेन लिप्यामि यदि नायामि ते गृहे कन्यायां कथ्यमानायां मंत्रं कुरुते नरः तस्य पापेन लिप्या
मि यदि नायामि ते गृहे पतिनिंदापरा नित्यं वेदनिंदापरो हि यः तस्य पापेन लिप्यामि यदि नायामि ते गृहे यस्य मंत्र
हारिणी भार्या ब्राह्मणी च विशेषतः तस्य पापेन लिप्यामि यदि नायामि ते गृहे प्रेतश्राद्धे तथा भुंक्ते पतिते वृषयाजके
श्रमस्थानास्थार्थं नित्यं तेष्वग्न्यागार्थविवर्जिते सखे पाखंडनिरते क्रयविक्रयकारके एतेषां पातकं मह्यं यदि नाया
मि ते गृहे एकाकी मिष्टमश्नाति भार्यापुत्रविवर्जितः तेन पापेन लिप्यामि यदि नायामि ते गृहे श्रांतमज्ञा
गुणसंपन्नं स्यमानमदृष्टो वै न प्रयच्छति यः कन्यां तस्यैवैज्ञातदुर्बुद्धैः तेन पापेन लिप्यामि यदि नायामि ते गृ
हे स्त्रीवाक्येन ततः श्रुत्वा लुब्धकोऽपि दृष्टमातनः संहृत्य बाणं सधानान्मुमोच हरिणीं तदा तस्मान्मुक्तिप्रभा
वेन लिंगस्यापि प्रपूजनात् तस्मिन्नेव क्षणे प्राप परां प्राप्तास्स गतिं तदा मंत्रस्याभ्यसनं सम्यक् प्राप्नोति समीप्यते स कुः
जालिमध्ये स्थितेनाप्यदृष्टा मा लुब्धकेन तु शतबुद्धस्य पद्मागात् ज्योटयिताकोणत बिम्बानि दक्षिणेभा

प्र॰ ता॰ क॰ १९५ गेलिंगोपरिछिन्नया तस्मात्त्वयायं यन्त्रितेनाथवा गोयत्नविसंयितः निष्ठुरेणैकचित्तेन कष्टं वार्यं जिघांसया नि
रीक्षितलुब्धको यावद्बाणांतस्तां विमुञ्चति तावत्तस्य गया समं हृष्टो दृष्ट्वा तं विह्वला भवत् अथैव भगिनी मे पिल
थुकेन विशेषतः मम किं जीवितेनानेन मम दुःखेन पीडिता वरमन्येन पृष्ठे कोवै दृष्ट्वा व्याघं विशेषतः एवं म
विमृश्य हरिणी लुब्धकं वाक्यमब्रवीत् यत्त्वयैवं व्याध सर्वजीवनिकृन्तन देहि मे वचनं चैकं विश्वासं मे मा नि
पातय आयाता हरिणी चैव मार्गेण तेन लुब्धक समायाता अथवा नैव सत्यं कथयस्व तत् तच्छ्रुत्वा लुब्धक
स्तु विस्मितेनाभवत् तस्मान्मृगया हर्षी वाणी भ्रमात् चैवमतता हर्षी सर्वे पंचागताद्वन्ते प्रीतिश्चापालना
यच अथवा त्वा समायाता यातया कथिता पुरा लुब्धकोवाच आहारार्थं कृतं कष्टं उद्वार्यं मया मृगी
अधुना त्वां हनिष्यामि देवतां स्मरणं कुरु व्याधोक्त वचनं श्रुत्वा हरिणी दुःखिता भृशं व्याधं प्राह हृदिस्थं वे
भो मां व्याध यतिष्यानय तेजो वलेन दास सर्वैर्निर्दयं विहाय चिन्ता अहं प्राणानि मोदनाभि भोजनं तेन जायते
वलवांस्त्वं महातेजा मत्समो समसमन्वितः अतस्त्वं पीनत्वौ तं गोहं त्वं मामिष्यति अहं चतुर्वेलात्वं ने मेदमां
सविवर्जितः केवलं पापभाक्तेहि मम प्राणविमोचकः मार्गेणानेन भो व्याघ्रागमिष्यति संकटे तं
हत्वा त्वं भो व्याध यत्यमित्र त्वं नेभविष्यति तयोक्तं लुब्धकः श्रुत्वा किं करोमीति विचिंत्य व मृगी प्राह प्रवक्ता १९५

र्थिपवं मे निश्चयो हृदि संचिंत्य लब्धकः प्राह मृगीं शोकातुरां कृशां सत्यं वद महाभागे प्रत्ययो मे यथा भवेत्
तत्त्वं वनेऽस्मिन्वाहरिणीरूपं वकार्षिता चक्रे मम प्रतिज्ञां तु माय स्याग्रे पुनः पुनः मृगी उवाच क्षत्रियस्त्वं रणेऽस्मि
न्संग्रामे यो न गच्छति तस्य पापेन लिप्यामि यदि नायामि ते गृहे एतच्छ्रुत्वा तु व्याधेन सापि मुक्ता मृगी तदा ॥
जालं पीत्वा वहु पशोर्गता मयो यथागतं जालिमध्ये स्थितस्याभ्र द्वितीयः प्रहरो गतः इति चिंताविल पत्राणि पुनर्दे
वेति पोजयेत् पीडितो जीवशेते नव यया गृहं चिंतया शिवः शिवेति जल्पन्नैनैन निद्रामुपलब्धवान् कृते स्मार्चे
नं तेन प्रहरे प्रहरे गते वीक्षते स्मेव दिशः सर्वाः स तमाशान्निरीक्षयत् लुब्धकेनाथ दृष्टो सौ हरिणः स्फुरते क्षणः
विलोकयन् दिशः सर्वा मार्गमाणो मृगीपदात् सौभाग्यबलदर्पाढ्यो मदोन्मत्तो युवा वृषः तं दृष्ट्वा बाणमध्ययम
श्वाकर्णं तु हृष्टचेतसा बाणं मंत्रं च निधाय वै हेतावदृष्टो मृगेणाथ कालरूपं तु तं दृष्ट्वा मृगश्चिंतितवान् भृशं निश्चयो भ
विता मृत्युः गोचरस्य गतो यतः भार्या प्राणसमा मे च व्याधेनैव हि विपातिता तया विरहितस्याद्य तं मृत्युर्भविष्या
ति हा हा काल कृतं पापं पञ्चार्यद्दुःखमागतं भार्यया न समं मे सौख्यं गृहे पि च वने पि च तया विना न धर्मोऽस्ति ना
र्थकामौ विशेषतः हृदन्मूले पिदयिता यत्र तिष्ठति सा गृहे प्रमादे पि तया हीना कांतारादतिरिच्यते धर्मकामार्थ
कार्येषु भार्या पुंसः सहायिनी विदेशे च गते नापि सैव विश्वासकारिणी नास्ति भार्यासमो बंधुर्नास्ति भार्यासम

व्र॰ सुवं नास्तिभार्यासमामेलोकेतस्मात्तस्यमेघजं यस्यभार्यागृहेनास्तिसापिचप्रियवादिनी अरण्यंतेनगंतव्यंयथा
ना॰कि॰ रण्यंतथागृहं पकाप्राणसमामेमद्वितीयाप्राणदामम इत्येवंचिंतयित्वातल्लुब्धकंवाक्यमब्रवीत् ॥ मृगउवाच
श्रृणुव्याधनरश्रेष्ठग्रामिषाहारभोजन यत्नेष्टद्यामयाहंवीरतस्मात्त्वंवदमेप्रभो आगतेहरिणीयुग्मेकेनमार्गेणात
१९६ रुते त्वयाविनाशितेवाथमत्पंकथयमेधुना तस्येतद्वचनंश्रुत्वालुब्धकोविस्मयंगतः अमाणपितसामात्योदे
वताकाप्यतुनमा लुब्धकउवाच उवाचलुब्धकःसत्यस्तस्याग्रेवाक्यमुत्तमं तेगतेनेनमार्गेणसत्यंकृतंमयामृगः
ताभ्यांदत्तोसिमृत्युर्गंमममतममधुनातथा संप्रतित्वांहनिष्यामिनैवमोक्ष्यामिकर्हिचित् मृगउवाच नमस्तेकी
दृशंताभ्यांवाक्यमुक्तंतवाग्रतः येनतेप्राणयोजातामृक्तेतद्धरिणीद्वयं तेगतेकेनमार्गेणयेमुक्तेव्याधतेधुना
व्याधउवाच तेगतेतेनमार्गेणत्वमाश्रमपदंप्रति व्याधेनकथितंतत्ताभ्यांशपथार्थेकृतंतदा तच्छ्रुत्वाव
चनंतस्यहरिणोःदुःखमानसः मृगउवाच ताभ्यांव्याधयदुक्तंचतत्करोमिनचान्यथा प्रभातेत्वद्गृहेनूनमाग
मिष्यामिनिश्चितं भार्यांश्चपश्यतीमेयकामार्गंप्यधुनामया गतागृहेथश्रुत्वातांत्राहश्छद्यचगृहंज्ञातात् ॥
शपथैरागमिष्यामिगृहेतेनात्रसंशयः मद्देहंरवगृहाणत्वमनेनशक्तःकथंचन नत्वूथामरणंमेस्यायदिचेद्वा
यचातये श्रमत्यमाश्रमेषुर्णंप्रतारयसिमांवृथा व्रतंमत्वाश्थितेतत्रतदागच्छतिकोलयीः व्याधस्यवचने १९६

श्रुत्वा हरिर्गिरा वाक्यमब्रवीत् शपथैरागमिष्यामि यथा ते व्याधयो भवेत् व्याध उवाच मृग त्वं शपथान् कृत्वा हि वि
श्वासो मे भवेद्यथा तथा हि प्रेषयामि त्वां स्वगृहं प्रति कामुक मृग उवाच भर्तारं वंचयेद्या स्त्री स्वामिते वचते तथा:
मित्रं च वंचयेद्यस्तु गुरुद्रोहं करोति य: विस्रम्भं भेदयास्त्रे मर्मभेदं करोति य: भेदयेद्यस्तडागानि प्रासादं पातयेन्नदा
प्रवामशीलयो विप्र: क्रयविक्रयकारक: संध्यास्नानविहीनस्त्र वेदशास्त्रविवर्जित: मद्यपस्त्रीरकाये परदा
रतास्त्रये परस्त्रीसेवका विप्रा: परपैशुन्यसूचका: शूद्रान्नभोजिनो ये च भार्यापुत्रान्त्यजंति ये वेदनिंदापरा ये च
वेदशास्त्रार्थनिंदका: तेषां वै पातकं मह्यं यदि नायामि ते गृहे भार्यासंग्रहिणीयस्त्वग्नौ येच विवर्जित: सर्वाशी
सर्वविक्रेता द्विजातामपि निंदका: त्रिषु वर्णेषु शुश्रूषां य: शूद्र: स्वकरोति वै विप्रवाक्यं परित्यज्य पाखंडाभिरता:
सदा ब्रह्मचर्यरता: शूद्रा ये च पाखंडमाश्रिता: तेषां वै पातकं मह्यं यदि नायामि ते गृहे तिला तैलं घृतं क्षौद्रं वल
वणं मधुडं तथा लोहं लाक्षणादिकुसुम्भं भंगगान्नानाविधानपि विक्रयेतानि शूद्रेण तत्र दोषो न विद्यते मद्यं मा
संमिषं द्रुयं तीली चह्र्षमं तथा मीनं तद्वीं सर्वकूटं विंशांतकफलानि च मद्यादि विक्रयेद्यस्तु शूद्रोपि मदमो
हित: श्राद्धे विस्मीपूत्तैगणाय्यंतेन पार्वती एतांस्त्वं स्मर हे मृग्यो योनप्पूजयते नर: एतेषां पातकं म
ह्यं यदि नायामि ते गृहे यो वपस्य शांति पादे न उदिते का गमव्यति एकाकी मिष्टमश्नाति तस्य पापस्य भागहं

श्रं॰ मातापित्रोर्भयोश्चैव क्रियाश्चादिण्य याचकः कन्याशुल्कोपजीवी च देवब्राह्मणनिंदकः गोघ्नाब्रह्महंतकाश्च अतिथी।
ता॰कौ नाचपूजनं येन कुर्वंति रविहिणास्तेषां पापं भवेन्मम हेंताकानि पटोलानि कलिंगानि विकानि च मूलकं लसनं
केदेकुसुंभं कनशाकके पत्तानि भक्षयेद्यस्तु नतृतीयैज्ञानतु वंलः तस्य वै जायते पङ्क्ति ब्रह्मचर्यगणाशतेनपि पातकं
१८७ पातकं मम तेषां यदि नायामि ते गृहे यः पठेन्नलसहीनं च लक्षणेन विवर्जितं इत्याहुः सं च चरन्ति विप्रो वेदाब्रहीरयेत्न
यः विप्रस्य पठतः श्रापि श्रृणोति यदि चोत्पजः वेदोपजीवको विप्रोऽतिलोभात् शूद्रभोजनः तस्य पापेन॰
संध्याहीने व्रतभ्रष्टे विप्रे वेदविवर्जिते तेन पापेन लिप्यामि यदि नायामि ते गृहं शूद्रान्नेभुंचयेमनुजाः शूद्रम
पर्कदोषिताः तेषां पापेन लिप्यामि यदि नायामि ते गृहे लेखकश्च कर्ता च वैद्यो न दत्तश्च सूचकाः कूटकर्त्ता
द्वितीयश्च तस्य पापस्य भागाहं कूटसाक्षी मृषावादी परद्रव्यापहारकाः परदाराभिगामी च ये च विश्वासघात
काः द्रव्योद्रव्यं विनिद्विष्य यान्त कूपेऽस्मान्निताः वेष्णवतामदाये च दाने दातुं निवारकाः भर्तारमपि।
हीतं चकुरूपं व्याधिपीडितं यात न पूजयते नारी रूपयौवनगर्विता एकादशीं न धामाद्ये यामा शिवचतु
र्दशी पूर्वं विधां प्रकुर्वन्ति तेषां पापस्य भागहं स्वयं किं वक्तुनीकेन मोलव्यकतवाग्रतः यदि नायामि ते
गेहे मम मस्तं भवेन्नव तेन वाक्येन संतुष्टो ब्राह्मणो वै वीतकल्मषः संहृष्य पठको वागर्णं सभे नकोपरसंस्थिते १८७

जलेपीत्वातुहरिणः प्रविष्टोगहनेवने ततोसौतेनमार्गेणगतोयेनमृगीद्वयं लुब्धकेनतवातत्रजालमध्य
स्थितेनहि प्रमृष्टैर्बिल्वपत्राणिच्छेदयितापुरतर्थच शिवशिवेतिजल्पन्वैश्राप्तज्ञातोनिजाश्रमं श्रुणोदितेसू
र्यविंवेश्रकामाज्ञाजागरेकृते पापान्मुक्तोप्यसौमृत्युः शिवपूजाप्रभावतः यावद्दिशोनिरीक्षेतनिराशोभोजनंप्रति
तावत्शिशुव्रतावान्तामृगीतत्रसमागता हृष्टपुष्टमृगीतदाव्याधेयाणंयत्नम्बिपोजयेत् यावन्मृचत्यसौवाणं
तावन्मृगीजयातदा माबाणंमुंचधर्मात्मनर्धर्मनामंचमृतुव्रत अहंनवध्यासर्वेषामितिशास्त्रविनिश्चयः अतः
प्राणीमिथुनासक्तोत्सनयोव्याधिपीडितः नहंतव्योमृगोराज्ञामृगीचशिशुनावृता अथवाधर्मसुतस्य
ज्यसेमांहनिष्यतिमातच वालकंस्वगृहेमुक्तासर्वीचैवनिवेदये वै शपथैरागमिष्यामिव्याधमृगाएववचो
मम यामव्रभर्त्तारंमुक्त्वाज्ञप्तपुंसिवतामदा तस्यपापेनलिप्यामियदिनायामितेगृहे मयंमांसंविषंज्ञ
गयेतीलंकुंभफलोनिय पतामिविक्रयेयस्तुनरोमोहसमन्वितः तस्यास्त्वहंचतेश्रुत्वाव्याधोविस्मयमा
गताः ततोव्याधेनसामुक्तागतावैनिजमंदिरं व्याधोपितत्रसत्काजगामस्वगृहंप्रति सर्वेषोवचते
व्याधतन्मृगाणांसमन्ताहिता पतेषांचान्तकोनित्यंअहेयास्यामिकांगतिं कुमाहृहंसमायातोवाल
काःक्षुधयाहताः तान्नमांसेनहेतस्यभोजनंयेनजायते निरामिषंततेहृष्ट्वानिराशास्तेभवंत्वदा

व्र·
ता·कि·
१९८

व्याघ्रोऽपि च तदा तत्र तेषां बालकानि संस्मरन् न भोजनं न निद्रां च लभते भ्रमयान्वितः आगमिष्यन्ति ते नूनं शाप
यैरपि यन्त्रिताः ननानहं वयिष्यामि मत्तो व्रतमनुस्मरन् लुब्धकेन तदा सक्रोशापथैर्हरिणा गताः स्वस्था
श्रमे तत्र संप्राप्तो यत्र तज्जरिणीद्वयं सद्यप्रसूतमात्रा चैका द्वितीया रतिलालसा तृतीयापि समायाता बालकै
र्वहुभिर्वृता सर्वाः समेताः एकत्र मरणे कृतनिश्चयाः परस्परं प्रजल्पन्तो लुब्धकस्य विचेष्टितं आयान्तीं हरि
णीं स्वां स्तनपानार्थं रतिलालसां दृष्ट्वा तु हरिणा लब्धस्तत्र कृतकृपोऽभवत्तदा हरिणोऽपि तदा सर्वांस्तेभ्यो बालकान्
थाब्रवीत् युष्माभिरिह संस्थेयं कर्तव्यं प्राणरक्षणं व्याघ्राद्द्वीपाल्लुब्धकेभ्यो बालकानि प्रयत्नतः अहं स
त्यात्वगोऽभार्यैतस्ते मोहसंवृतः मृगणहा मतो विज्ञेयस्तस्य जन्म निरर्थकं संतानात्स्वर्गमाप्नोति इहकी
र्तिं शाश्वती संजनिर्यत्नतः पाल्यास्सर्वे सौख्यप्रदायिकाः अपुत्रस्य गतिर्नास्ति इहलोके परत्र च येन केना
प्युपायेन पुत्रमुत्पादयेत्तस्मात् मया चैतत् द्वयं तत्र व्याघ्रस्य संहितं सत्यं तु पालनीयं स्यात्सत्ये धर्मः प्रति
ष्ठितः एतत्तस्य वचः श्रुत्वा तन्नाथे वाक्यमब्रुवन् दुःखिता वयमप्यागमिष्यामस्त्वया सार्थं मृगोत्तम तदा
ते विप्र यं कान्तकथं स्मरामकाचन पुष्पिते सुवर्णा ते सुवर्णो तं संगमे सुच कंदरेषु च शैलानां गुहासु भिरक्षि
नावयं न कार्यमद्य समस्माकं क्रीडितेन त्वया विना नारीणां पतिहीनानां जीवितैः किं प्रयोजनं मितेद १९८

ददाति हि पिता मितं भ्राता मितं सुताः अमितस्य तु दातारं भर्तारं का न पूजयेत् अपि द्रव्यशतानां नारी वहुपुत्रसखाप्यहो तु या
साशोच्या बंधुवर्गस्य पतिहीना तु यांगना गंधमाल्यं स्त्रियो नित्यं पीयते मद्यं स्मृतः नातंत्री वाद्यते वीणा नाचक्रो
वर्तते रथः नापतिः सुखमाप्नोति नारी पुत्रशतैरपि नास्ति भर्तृसमो धर्मो नास्ति धर्मसमः सुहृत् नास्ति भ
र्तृसमो नाथः स्त्रीणां भर्तृपरा गतिः एवं विलप्यमानाः सर्वाः मरणे कृतनिश्चयः बालकैस्तैः समायुक्ता भर्तृ
पुत्रकेन तु दुःखिताः मृगस्तासां वचः श्रुत्वा दुःखितो भवत् गंतव्यं किं तु गंतव्यं मया व्याधस्य मंदिरं एकतः
सुकृतं त्वेकतः तु वस्तु तयो भवेत् तदंति कृत्वा चैव यामि मम सत्यं च तथं व्रजेत् वरं पुत्रस्य मरणं भार्याया आत्मन
स्तथा सत्यं कृत्वा परो नित्यं माकल्पं रौरवं व्रजेत् तस्मात्सत्यं पालनीयं नरैः श्रेयोर्थिभिः सदा एवं संचिंत्य हरिणो य
मनसा दिमनोरमात् ताभिः सहैव शनकैः ततस्तु गाणादाश्रमं ययौ तस्मिन्नवसरे तस्मिन् सुस्नात्वा कर्मनाम सेचकार सः
तल्लिंगं प्राणिनां प्रायश्चादि तथा यत्सदा शिवं गानपानं परित्यज्य मैथुनं भोगमेव च कामं क्रोधं तथा लोभं मायां
मोहं विनाशिनी वेदयित्वा अथ तं देवं लुब्धकाभिमुखो ययौ तस्य भार्याश्च पुत्राश्च मरणे कृतनिश्चया अनाश
कं व्रतं मृगस्य पुच्छलग्नाः समायाता भार्यापुत्रैः परिवृतो मृगस्तं देशमागमत् दृष्टिवा तो बालकैर्युक्तो लुब्धको पत्र
तिष्ठति मृगस्तं देशमागम्य अंतु देवेन समन्वितः पालयन्सत्यवाक्यानि लुब्धकं वाक्यमब्रवीत् मृग उवाच

ब्र· हतमोप्रथमेव्याधपक्ष्यादीनांक्रमेणतु बालकालितनःपश्चाद्धन्यतोमाविलंबय लुब्धकेत्तमृगोभद्रा
वा·कीं· नास्तिदोषाःकथंचन वयंधास्यामःस्वर्गलोकेमत्प्रसूताःनसंशयः तथाकृतेसकुटुंबस्यप्राणएषभविष्य
ति एतच्छ्रुत्वातुवचनंमृगेनपरिभाषितं आत्मानंनिंदयित्वातुलुब्धकोवाक्यमब्रवीत् व्याधउवाच।
१५५ अहोमृगमहाभागगच्छगच्छस्वमाश्रमं आमिषेणनमेकार्यंपुत्राद्यांतत्रविष्यति जीवानांघाततेपापंवे
वेतर्जितेनथा नैवपापंकरिष्यामिकुटुंबार्थेकदाचन तंवकर्ममयधर्मोगातउपदेष्टामृगोत्तम गच्छगच्छमृ
गश्रेष्ठकुटुंबेनसमन्वितः मयात्यक्तानिशस्त्राणिसत्यधर्मसमाश्रितः मृगउवाच कर्मत्यागमहंकृत्वा
त्वत्सकाशमिहागताः हन्यतोहन्यतोपृथ्वीवंनतेपापंभविष्यति मयादत्ताधुरावाचातयावद्धोनयास्यहं ॥
एतच्छ्रुत्वातुवचनंलुब्धकोवाक्यमब्रवीत् लुब्धकउवाच त्वंवैधन्यस्त्वंगुरुर्ज्ञातात्वंमेमातापिताहृहृत्।
मयात्यक्तानिशस्त्राणित्यक्तेमायादिकेबले कस्यभार्याहृताःकस्यकुटुंबस्यमहामृग तैःस्वकर्मचभोक्त
व्यंस्यागच्छयथासुखं इत्युक्तासमतदातूर्णीवभंजसमश्रंयत्वः मृगोप्रदक्षिणीकृत्यनमस्कृत्यक्षमापयेत्
एतेस्मिन्नंतरेतेजेदेवाःदुंदुभयोदिवि आकाशात्पुष्पवृष्टिस्तुपपातहृमस्तोहरा तदाहतःसमायातोविमा
नंमृगलुब्धकौभृते देवहृतउवाच अहोव्याधमहाभागतवसर्वमहनञ्चयेकर विमानमिदमारुह्यसदेहंस्वर्गं १५५

मघिश शिवरात्रिप्रभावेन पातकैस्तैस्त्वयं गतं उपवासस्त्वसंजातो निशि जागरणं कृतं यामे यामे कृता पूजा त्व
ज्ञानेन शिवस्य च सर्वपापविनिर्मुक्तो गच्छ त्वमद्य मंदिरं विमानं च समारुह्य सत्याच्छत्रपद्ध्वज सुराराजमहाम
त्स भार्यपुत्रसमन्विता भार्यात्रिय संयुक्तोनत्वत्र पदमाप्नुहि नवनास्त्वानुतस्त्वंद्वं लोके ख्यातं भविष्यति एतत्
श्रुत्वा तु वचनं लुब्धकेन समन्वितं विमानं तत्र दोकस्मान्तत्र पदमागतः हरिणीं च यमन्वेष्टं हृष्टतोस्त्वरामेव
च तारात्रितयं संयुक्तं मृगशीर्षं तदुच्यते वालकः हिमधं चाग्रे त्वंनीयाद्दृष्टतो मृगी दृष्टतस्तत्र संप्राप्तो मृगशीर्षे
स्मन्निधौ सुरारादृष्टपणे येया पिबस्त्वं व्योममार्गं तम् उपवासं करिष्यंति जागरेण समन्विते यथोक्तशास्त्रमा
र्गेण ते यांमोक्षो न संशयः शिवरात्रिसमं नास्ति व्रतं पापापहं यथापहे यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः
अश्वमेधसहस्राणि वाजपेयशतानि च प्राप्नोति तत्फलं सर्वं नात्र कार्या विचारणा ॥ इति श्रीलिंगपुराणे उमा
महेश्वरसंवादे शिवरात्रिव्रतं अथोद्यापनं हेमाद्रौ स्कांदे स्कंद उवाच व्रतस्योद्यापनं कर्म कथं कार्यं च मानवैः
को विधिः कानि द्रव्याणि कथयस्व मम प्रभो ईश्वर उवाच श्रृणु षण्मुख वत्स त्वेन लोकानां हितकाम्यया उद्यापन
विधिं चैव कथयामि तवाग्रतः यथा संजायते चित्तं भक्तिश्रद्धासमन्वितं सप्तव्रतकालमस्याद्यतो तिथिं हि जी वि
ते चतुर्दश्या हि कर्तव्यं शिवरात्रिव्रतं शुभं एकभक्तं त्रयोदश्यां चतुर्दश्यामुपोषणं संपाद्य सर्वसंभारान्

ग्रं· ता·कं· २००

200

उपेतं तत्र कारयेत् वस्त्रैः शुभैः समाच्छन्ने पट्टवस्त्रैश्च शोभिते तन्मध्ये लेखयेद्दिव्यं लिङ्गतोभद्रमण्डलं अथवा सर्व
तोभद्रमण्डपान्तः प्रकल्पयेत् पुष्पोपपुष्पमालाभिर्युक्तं दीपैः सर्वत्र सोज्ज्वलं रुद्रनाम्नातमोतेनक्षालनाणानपि पू
जयेत् अर्घ्यार्थं जलं कुंभं तत्रस्थं पवित्रं विन्यसेत् सौवर्णं राजतं ताम्रं मृण्मयं वापि कारयेत् कुंभोपरि न्यसे
द्देवं उमया सहितं शिवं सौवर्णं रूप्यं वा रौप्ये वृषभे संस्थितं प्रभो रत्नालंकारैर्देहैमैरलंकृत्य प्रपूजयेत् पले
न वा तदर्धेन तदर्धार्धेन वा पुनः वस्त्रयुग्मेन संवेष्ट्य बिल्वपत्रैः प्रपूजयेत् उमामहेश्वरं सम्यक् संपूज्य वृषभे स्थि
तं सोमं च सगणं चैव पूजयित्वा महेश्वरं होमं कुर्यात्प्रयत्नेन रौद्रमन्त्रैर्यथाविधिः ब्राह्मणान्पूजयेज्जाभो
जयेच्च चतुर्दश आचार्यं च सपत्नीकं वस्त्रालंकारभूषणैः यज्ञोपवीतवस्त्रादि दद्यात्तेभ्यः पृथक् पृथक् गां स
वत्सां सवस्त्रां तां नानालंकारभूषणां दद्यादाचार्यवर्याय शिवो मे प्रीयतामिति ततः सकुंभां सवितानं च सवस्त्रां ।
वृषभे स्थितां सर्वालंकारसहितां आचार्याय निवेदयेत् व्रतमेतत्कृतं यन्मे पूर्णं वापूर्णमेव च सर्वं संपूर्णं
तां यातु प्रसादाद्भवतो मम इति संप्रार्थितान्विप्रान्प्रणम्य च पुनः पुनः अजैकपादिकेभ्यो दद्यात्कुंभान्द्व
थक् पृथक् पूर्णान्सोदपात्रैश्च सत्रिशोधनयेद्बुधः ततः प्रभातसमये कृत्वा संध्यादिकाः क्रियाः पुनः पू
जां प्रकुर्वीत ततो होमं समारभेत् तिलव्रीहियवैश्चैव पायसाज्येन भक्तितः । ॐ त्र्यंबकमिति मंत्रेण ततः सं पी २००

भवेदिति च गौरीर्मिमायेति मंत्रेण शतमष्टोत्तरं हवं होमं कुर्याद्वा मूलमंत्रेण बिल्वपत्रैस्तु नामभिः अजैकपादहि
र्बुध्न्यो भवः शर्व उमापतिः रुद्रः पशुपतिः शंभुः वरदः शिव ईश्वरः महादेवो हरो भीमो नामान्येवं चतुर्दश पू
र्णाहुतिं ततो हुत्वा कर्मशेषं समापयेत् एतैर्होमः प्रकर्त्तव्यः कुंभदाने पिता स्मरेत् भोजनं समापयेद्देवमेभिः
नामपदैः पृथक् प्रतिमां कुंभसहितामाचार्याय निवेदयेत् शंभो प्रसीद देवेश सर्वलोकेश्वर प्रभो तवेद म.५
प्रदानेन मम संतु मनोरथाः यज्ञोपवीतवस्त्राणि दद्यात्तेभ्यः पृथक्पृथक् आचार्यं पूजयेत्पश्चाद्वस्त्रालंका
रभूषणैः गां सवत्सां तथा दद्यात्कर्मसंपूर्तिहेतवे अन्येभ्योऽपि यथाशक्ति ब्राह्मणेभ्यो हि दक्षिणां आचार्या
य प्रदद्यात्तु संपूर्तिमाहेश्वरीं तथा आचार्यं पूजयेत्पश्चाद्वस्त्रालंकारभूषणैः चतुर्दश प्रदातव्या विप्रेभ्यो जलपू
रिताः कुंभा यज्ञोपवीतानि वस्त्राणि च पृथक्पृथक् पूर्णमेव च वस्त्राणि शय्यां सोपस्करां तथा द्वादशैव तु गां द
द्यात्परिधानादिकं तथा अथवा दक्षिणामेव प्रदद्यात्तज्जुहुयात्तिलान् व्रतमेतत्कृतं यन्मे पूर्णं वाऽपूर्णमेव वा
सर्वं संपूर्णतां यातु प्रसादात्तव शंभो मम इति संप्रार्थ्य तान्विप्रान्क्षमापयेत् ततः स्वजनैः सार्धं स्वयं भुंजी
त सुव्रती इति स्कांदे शिवचतुर्दश्युद्यापनं इति श्रीमद्भट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के चतुर्दशीव्रतानि
तत्र ज्येष्ठपूर्णिमायां वटसावित्रीव्रतं तत्र पूर्वविद्धा न कर्तव्या अमावास्या च पूर्णिमा वर्जयित्वा मुनिश्रेष्ठ

व्र· सावित्रीव्रतमनुत्तमसिति ब्रह्मवैवर्त्ते वर्जयित्वेतिपर्वदिमसादष्टादशनाडीवेधः सावित्रीव्रतानि निरुक्तप
ना·की· यः इतिकविवितवल्लगतस्त मूलविद्धातिषेध्यापवमूलतानाष्टादशनाडाभिमिवाकंवेदनियमेविधेयाप्रवर्त्ततेला
२०१ यवात अमावास्यासावित्रीव्रते ऽष्टादशनाडीवेधदोषकल्पनायांनिषेधानवकल्पनागौरवंस्यात इदंचत्रयोदशी
मारभ्यपूर्णिमान्तेकर्त्तव्यं तथाचस्कांदभविष्योः ज्येष्ठमासिसितेपक्षेद्वादश्यांजननीमये व्रतेत्रिरात्रमुद्दि
श्यस्वकाराद्यमिच्छामेवैदितुपक्रम्यान्तेऽपसंहृतं ज्येष्ठमासिसितेपक्षेपूर्णिमायांतथाव्रते चर्णेत्वगमहाम
नाकथितेतेमहाजनेवेति धर्मराजउवाच नारीवाविधवावापिसपुत्राऽपुत्रवर्जिता सभर्तृकासपुत्रावाकु
र्याद्व्रतमिदंशुभं ज्येष्ठमासिसितेपक्षेपौर्णमास्यांपतिव्रता स्नात्वाचैवशुचिर्भूत्वानियमंकारयेत्ततः॥
अमावास्यान्तेनिर्णयासेऽतेभविष्ये अमावास्यांचतथाज्येष्ठेवटमूलेमहासती त्रिरात्रोपोषितानारीविधिना
नेनपूजयेदिति अथव्रतविधिः आचम्यमासपक्षाद्युल्लिख्यममभर्तुः पुत्राणांचआयुरारोग्यप्राप्तयेज
न्मनिजन्मन्यवैधव्यप्राप्तयेचसावित्रीव्रतमहंकरिष्येइतिसंकल्प्य वटसमीपमितेमूलेसलिलैरमृतोप
मैः सूत्रेणवेष्टयेद्वृक्षंगंधपुष्पाक्षतैःशुभैः ॐनमोवैवस्वतायेतिभ्रामयेतिप्रदक्षिणं मन्त्रादन्तेंधर्मराज
सावित्रीप्रतिमास्थानं पाद्यं मन्त्रामसमाहृतंतोयंफलपुष्पसमन्वितं अर्घ्यंगृहाणसावित्रीममाऽस्यव्रत २०१

201

सिद्धये अर्घ्यं स्नानीयं सहकर्पूरं सुधर्मसमायुक्तं शीतलं सुवर्णसहसावित्री कुर्याद्दाचमनीकं आचमनं अर्थं
चामृतं तेन स्नातं मया भक्त्या च कल्पितं मंदाकिन्याः समानीतं उदकं च महाप्रिये सावित्र्यै धर्मराजाय च स्नानं आच
मनं समर्पितं तेन मया च स्नकर्पूरं विनिर्मितं सावित्रीसत्यवत्प्रीतेन मया दत्तं प्रगृह्यतां सावित्रीसत्यवत्प्रीते धर्मरा
सुरेश्वर सावित्री ब्रह्मणाभार्ये सुपवीतं प्रगृह्यतां यज्ञोपवीतं कुंकुमागुरुकर्पूरं कस्तूरीरोचनायुतं चंदनं
तेन मया दत्तं सावित्री प्रतिगृह्यतां चंदनं अक्षतान् च स्वर्णस्योपरि कुंकुमाक्तान् सुशोभनान् मयानिवेदितान् भक्त्या गृह
हाण परमेश्वरि इत्यक्षतान् माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभोः मयाहृतानि पुष्पाणि पूजार्थं प्रति
गृह्यतां पुष्पं अथांगपूजा सावित्र्यै पादौ पू० प्रभाविन्यै जंघे पू० कमलायताक्ष्यै कटिं पू० भूतधारिण्यै उद
रं पू० ब्रह्मणःप्रियायै शिरः पू० अथ ब्रह्मणसत्यवदंगपूजा धात्रे नमः पादौ ज्येष्ठाय नमः उदरं परमेष्ठिने नमः मे
ढ्रं अग्निरूपाय नमः कटिं वेदवेत्ते नमः ऊरू पद्मनाभाय नमः हृदये वेधसे नमः कंठे हिरण्यगर्भाय नमः
मुखे ब्रह्मणे नमः शिरसि विश्ववे सर्वांगं पूजयामि देवद्रुमरसोद्भूतकालागरुसमन्वितः आघ्रेयतां
मया धूपो सावित्री प्रतिगृह्यतां धूपं वस्त्रादैस्सर्वलोकानां तिमिरस्य निवारणं आर्तिक्यं कल्पितं भक्त्या गृहा
ण परमेश्वरि दीपं अन्नं चतुर्विधं मिततिनैवेद्यं आचमनं इदं फलमिति फलं पूगीफलं महद्दिव्यमिति

व्र॰
ता॰कं॰
२०२

ताम्बूले हिरण्यगर्भगर्भस्थमिति दक्षिणा सावित्री च परमा विद्या सर्वे ब्राह्मणाः प्रिये पूजिताः सिद्धिजैः सर्वैस्त्रि
भिर्वृत्तिगणैस्तथा त्रिसंध्यं देवि भक्ता नो वदन्ती या स्मिता वने मया दत्ता च पूजा यं त्वं ब्रह्माणं नमोऽस्तु ते इति पूजां ज
लिं दत्वा ततोर्घ्यं दद्यात ओंकारपूर्वकं देवि सर्वदुःखनिवारिणि देहि मानं नमस्तुभ्यं मे वैधव्यं प्रयच्छ मे इति
व्रतं महाभागे चान्द्रिजातेह विस्मिते ह्यद्भुते हृष्टमते मत्तुष्प्रिय वादिनि अवैधव्यं च सौभाग्यं देहि त्वं मम
सव्रते पुत्रान् पौत्रांश्च सौख्यं च ब्रह्माणार्घ्यं नमो नमः इत्यर्घ्यं अथ प्रार्थना सावित्री ब्रह्मगायत्री सर्वदा प्रिय
भाषिणी वेदमाते नमस्तेन मां पाहि दुःखसंसारसागरात् त्वं गौरी त्वं शची गौरी त्वं प्रभा चन्द्रमण्डले त्वमेव च जगन्मा
तात मद्दुःखवारान्ते यन्मया दुःकृतं सर्वं कृतं जन्मशतैरपि भस्मीभवतु तत्सर्वं अवैधव्यं च देहि मे अवि
योगो यदा देव सावित्र्या सहितस्तथा अवियोगस्तथास्माकं भूयाज्जन्मनि जन्मनीति प्रार्थना इति पूजा
विधिः अथ कथा स्कन्दे सनत्कुमार उवाच कुलस्त्रीणां व्रतं देव महाभाग्यं तथैव च अवैधव्यकर
स्त्रीणां पुत्रपौत्रप्रदायिकं ईश्वर उवाच आसीन्मद्रेषु धर्मात्मा ब्रह्मण्यो परमधार्मिकः नाम्ना चाश्वपति
र्नीतिवेदवेदांगपारगः अनपत्यो महाबाहुः सर्वैश्वर्यसमन्वितः सपत्नीकस्तपस्तेपे समाराधयतेऽस्या
सावित्री च परमा विद्या जपमालेन महामना ॐ ह्रीं इति चैव सावित्रीं मन्त्रां परमया युतः ततस्कष्टात्सा २०२

देवी सावित्री द्विजसत्तम सा विग्रहवती देवी तस्य दर्शनमागता तां तु दृष्ट्वा जगादेदं ओं सावित्री च नृपोत्तमः प्र
णिपत्य ततो भक्त्या प्रहृष्टेनान्तरात्मना तेन दृष्ट्वा पतितं भूमौ तुष्टा देवी जगाद ह तुष्टास्मि तव राजेन्द्र वरं वरय सुव्र
त एवमुक्तस्तया राजा प्रसन्नां तामुवाच ह अनपत्योस्म्यहं देवि पुत्रमिच्छामि शोभने तान्त्वहं प्राणोमि सावित्री पु
त्रमेव जगन्मये अन्यदस्ति समग्रं मे द्वितीयस्माद्विदुर्लभे प्रसादात्तव देवेशि तत्सर्वं विद्यते गृहे एवमुक्ता तु सा
देवी प्रत्युवाच नराधिपं पुत्रस्ते नास्ति राजेन्द्र कन्यैका ते भविष्यति इत्युक्त्वान्तं मतिश्रेष्ठं राजानं ब्रह्मणः प्रिया
अन्तर्जीनं गता देवी सोऽपि हृष्टो महीपतिः ततः कतिपयाहस्सु तस्य राज्ञी महीभुजः ससत्वा समजायत तत्पूर्णे
काले सुषावच सा विद्यात्तु यस्माद्दत्ता सावित्र्या जपयात्तया सावित्रीति तेन चक्रे तस्या नाम स भूपकः सा जाने देवा
